श्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च मे यज्ञेन कल्पन्ताम्॥७॥ ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे यज्ञेन कल्पन्ताम्॥८॥ रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे पूर्णं च मे पूर्णतरं च मे कुयवं च मेऽक्षितं च मेऽन्नं च मेऽक्षुच्च मे यज्ञेन कल्पन्ताम्॥१०॥ वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथ्यं च म ऋद्धं च म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे यज्ञेन कल्पन्ताम्॥११॥ व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम्॥१२॥ अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे श्यामं च

म२ म नै१

मे लोहं च मे सीसं च मे त्रपु च मे यज्ञेन कल्पन्तां ॥१३॥ अग्निश्च मे आपश्च मे वीरुधश्च
मे ओषधयश्च मे कृष्टपच्याश्च मे ऽकृष्टपच्याश्च मे ग्राम्याश्च मे पशव आरण्याश्च
मे वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे यज्ञेन कल्पन्तां ॥१४॥ वसु च मे वस
तिश्च मे कर्म च मे शक्तिश्च मे ऽर्थश्च म एमश्च म इत्या च मे गतिश्च मे यज्ञेन कल्प
न्तां ॥१५॥ अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे
सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे यज्ञेन
कल्पन्तां ॥१६॥ मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे धाता च म इन्द्र
श्च मे त्वष्टा च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे यज्ञे
न कल्पन्तां ॥१७॥ पृथिवी च म इन्द्रश्च मे ऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इ
न्द्रश्च मे समाश्च म इन्द्रश्च मे नक्षत्राणि च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे य

वीर्य्यम्मयि धेहि बलमसि बलम्मयि धेह्योजोऽस्योजो मयि धेहि मन्युरसि मन्यु
म्मयि धेहि सहोऽसि सहो मयि धेहि॥९॥ या व्याघ्रम्॥ या व्याघ्रं विषूचिकोभौ वृ
कञ्च रक्षति॥ श्येनम्पतत्रिणꣳ सिꣳहꣳ सेमम्पात्वꣳहसः॥१०॥ यदापिपेष॥
यदापिपेष मातरम्पुत्रः प्रमुदितो धयन्॥ एतत्तदग्ने अनृणो भवाम्यहतौ पि
तरौ मया॥ सम्पृच स्थ सम्मा भद्रेण पृङ्क्त विपृच स्थ वि मा पाप्मना पृङ्क्त॥११॥
देवा यज्ञम्॥ देवा यज्ञमतन्वत भेषजम्भिषजाश्विना॥ वाचा सरस्वती भिषगिन्द्रा
येन्द्रियाणि दधतः॥१२॥ दीक्षायै रूपम्॥ दीक्षायै रूपꣳ शष्पाणि प्रायणीय
स्य तोक्मानि॥ क्रयस्य रूपꣳ सोमस्य लाजाः सोमाꣳशवो मधु॥१३॥ आतिथ्य
रूपम्मासरम्॥ आतिथ्यरूपम्मासरम्महावीरस्य नग्नहुः॥ रूपमुपसदामेतत्ति
स्रो रात्रीः सुरा सुता॥१४॥ सोमस्य रूपम्॥ सोमस्य रूपं क्रीतस्य परिस्रुत्परि

92

१०३

ति ना०।। अश्विभ्यां प्रातःसवनमिन्द्रेणैन्द्रꣳ सरस्वत्या।।१५।। आसन्दी रूपम्।। आस

न्दी रूपꣳ राजासन्द्यै वेद्यै कुम्भी सुराधानी।। अन्तर उत्तरवेद्या रूपं कारोतरं भिषक्

२।।१६।। वेद्या वेदिः।। वेद्या वेदिः समाप्यते बर्हिषा बर्हिरिन्द्रियम्।। यूपेन यूपः आ

प्यते प्रणीतो ऽग्निरग्निना।।१७।। हविर्धानं यत्।। हविर्धानं यदश्विनाग्नी

ध्रं यत्सरस्वती।। इन्द्रायैन्द्रꣳ सदस्कृतं पत्नीशालं गार्हपत्यः।।१८।। प्रैषेभिः

प्रैषान्।। प्रैषेभिः प्रैषानाप्नोत्याप्रीभिराप्रीर्यज्ञस्य।। प्रयाजेभिरनुयाजान्व

षट्कारेभिराहुतीः।।१९।। पशुभिः पशून्।। पशुभिः पशूनाप्नोति

पुरोडाशैर्हवीꣳष्या।। छन्दोभिः सामिधेनीर्याज्याभिर्वषट्कारान्।।२०।। धा

नाः करम्भः।। धानाः करम्भः सक्तवः परीवापः पयो दधि।। सोमस्य रूपꣳ ह

विष आमिक्षा वाजिनं मधु।।२१।। धानानां रूपम्।। धानानाꣳ रूपं कुवलम्

१०३

ले४

९४

इडाभिर्भक्षानाप्नोति सूक्तवाकेनाशिषः ॥ शंयुना पत्नीसंयाजान्त्समिष्टयजुषा
संस्थाम् ॥२९॥ व्रतेन दीक्षाम् ॥ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् ॥
दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥३०॥ एतावद्रूपम् ॥ एतावद्रूपं यज्ञ
स्य यद्देवैर्ब्रह्मणा कृतम् ॥ तदेतत्सर्वमाप्नोति यज्ञे सौत्रामणी सुते ॥३१॥ सुरा
वन्तम्बर्हिषदम् ॥ सुरावन्तम्बर्हिषदं सुवीरं यज्ञं हिन्वन्ति महिषा नमो
भिः ॥ दधानाः सोमन्दिवि देवतासु मदेमेन्द्रं यजमानाः स्वर्काः ॥३२॥ यस्ते ॥

१०४

यस्ते रसः सम्भृत ओषधीषु सोमस्य शुष्मः सुरया सुतस्य ॥ तेन जिन्व
यजमानं मदेन सरस्वतीमश्विनाविन्द्रमग्निम् ॥३३॥ यमश्विना ॥ यमश्विना
नमुचेरासुरादधि सरस्वत्यसुनोदिन्द्रियाय ॥ इमन्तं शुक्रं मधुमन्तमि
न्दुं सोमं राजानमिह भक्षयामि ॥३४॥ यदत्र ॥ यदत्र रिप्तं रसिनः सुत

नोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्याया
भिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि ॥ ३ ॥ कोऽसि । कत
मोऽसि कस्मै त्वा काय त्वा ॥ सुश्लोक सुमङ्गल सत्यराजन् ॥ ४ ॥ शिरो मे ॥ शिरो मे
श्रीर्यशो मुखं त्विषिः केशाश्च श्मश्रूणि ॥ राजा मे प्राणो अमृतꣳ सम्राट्
चक्षुर्विराट् श्रोत्रम् ॥ ५ ॥ जिह्वा मे भद्रं वाङ्महो मनो मन्युः स्वराड् भामः ॥ मोदाः

११०

प्रमोदा अङ्गुलीरङ्गानि मित्रं मे सहः ॥ ६ ॥ बाहू मे ॥ बाहू मे बलमिन्द्रियꣳ
हस्तौ मे कर्म वीर्यम् ॥ आत्मा क्षत्रमुरो मम ॥ ७ ॥ पृष्ठीर्मे । राष्ट्रमुदरमꣳ
सौ ग्रीवाश्च श्रोणी ॥ ऊरू अरत्नी जानुनी विशो मेऽङ्गानि सर्वतः ॥ ८ ॥ नाभि
र्मे । चित्तं विज्ञानं पायुर्मेऽपचितिर्भसत् ॥ आनन्दनन्दावाण्डौ मे भगः सौ

नाध्वर्यूसादयतामिहत्वा॥१॥ कुलायिनीघृतवती॥ कुलायिनीघृतवतीपुरन्धिःस्योनेसीद
सदनेपृथिव्याः॥ अभित्वारुद्रावसवोगृणन्त्विमाब्रह्मपीपिहिसौभगायाश्विनाध्वर्यू
सादयतामिहत्वा॥२॥ स्वैर्दक्षैर्दक्ष॥ स्वैर्दक्षैर्दक्षपितेहसीददेवानांᳪसुम्नेबृहतेरणाय॥
पितेवैधिसूनवआसुशेवास्वावेशातन्वासंविशस्वाश्विनाध्वर्यूसादयतामिहत्वा॥
३॥ पृथिव्याःपुरीषम्॥ पृथिव्याःपुरीषमस्यप्सोनामतान्त्वाविश्वेअभिगृणन्तुदे
वाः॥ स्तोमपृष्ठाघृतवतीहसीदप्रजावदस्मेद्रविणायजस्वाश्विनाध्वर्यूसादयतामि
हत्वा॥४॥ अदित्यास्त्वा॥ अदित्यास्त्वापृष्ठेसादयाम्यन्तरिक्षस्यधर्त्रीँविष्टम्भनीन्दि
शामधिपत्नीम्भुवनानाम्॥ ऊर्मिर्द्रप्सोअपामसिविश्वकर्मातऋषिरश्विनाध्व
र्यूसादयतामिहत्वा॥५॥ शुक्रश्च॥ शुक्रश्चशुचिश्चग्रैष्मावृतूअग्नेरन्तःश्लेषो
सिकल्पेतान्द्यावापृथिवीकल्पन्तामापओषधयःकल्पन्तामग्नयःपृथङ्ममज्यैष्ठ्या
यसव्रताः॥ येअग्नयःसमनसोन्तराद्यावापृथिवीइमे॥ ग्रैष्मावृतूअभिकल्पमाना

स मा॥ वसुभी रुद्रैरादित्यैः॥ सयुग्भिर्बर्हिरासदद्वेत्वाज्यस्य होतर्यज॥४॥ होता
यक्षद्दो ज्ञो ना होता यक्षद्दो ज्ञो न वीर्य्यं सहो द्वारः इन्द्राय मीढुषे व्यन्त्वाज्य
स्य होतर्यज॥५॥ होता यक्ष दुषे इन्द्रस्य धेनू सुदुघे मातरा मही॥ सवातरौ
न तेजसा वत्समिन्द्रमवर्द्धतां वीतामाज्यस्य होतर्यज॥६॥ होता य
क्षद्दैव्या होतारा होतारौ दैव्या होतारा भिषजा सखाया हविषेन्द्रं भिषज्य
तः। कवी देवौ प्रचेतसाविन्द्राय धत्त इन्द्रियं वीतामाज्यस्य होतर्यज॥७॥
होता यक्षत्तिस्रो देवीः होता यक्षत्तिस्रो देवीर्न भेषजं त्रयस्त्रिधातवोऽपसः इ
डा सरस्वती भारती महीः॥ इन्द्रपत्नीर्हविष्मतीर्व्यन्त्वाज्यस्य होतर्यज॥८॥

100

इति सांहितापाठे सप्तविंशतितमोध्यायः॥ होता यक्षत् होता यक्षत्समिधे
न्द्रमिडस्पदे नाभा पृथिव्या अधि॥ दिवो वर्ष्मन्त्समिध्यत ओजिष्ठ
श्चर्षणीसहां वेत्वाज्यस्य होतर्यज॥१॥ होता यक्षत्तनूनपातमू
तिभिः होता यक्षत्तनूनपातमूतिभिर्जेतारमपराजितम्॥ इन्द्रं देवꣳ
स्वर्विदं पथिभिर्मधुमत्तमैर्नराशꣳसेन तेजसा वेत्वाज्यस्य होत
र्यज॥२॥ होता यक्षदिडाभिरिन्द्रम्॥ होता यक्षदिडाभिरिन्द्रमीडितमाजु
ह्वानममर्त्यम्॥ देवो देवैः सवीर्यो वज्रहस्तः पुरन्दरो वेत्वाज्यस्य होतर्यज स्य
॥३॥ होता यक्षद्बर्हिषीन्द्रम्॥ होता यक्षद्बर्हिषीन्द्रं निषद्वरं वृषभं नर्याप

दक्षसे ॥ एषव्वस्य मृतं जातवेदसम्प्रियम्मित्रन्न शंसिषम् ॥४२॥
पाहि नः । पाहि नोऽअग्न ऽएकया पाह्युत द्वितीयया ॥ पाहि गीर्भिस्ति
सृभिरूर्ज्जाम्पते पाहि चतसृभिर्व्वसो ॥४३॥ ऊर्ज्जो नपातम् ॥ ऊर्ज्जो
नपातँ स हिनायमस्मयुर्द्दाशेम हव्यदातये ॥ भुवद्वाजेष्ववितां भुव
द्वृधऽउत त्राता तनूनाम् ॥४४॥ संवत्सरोसि ॥ संवत्सरोसि परिवत्स
रोसीदावत्सरोसी द्वत्सरो सि वत्सरोसि ॥ उषसस्ते कल्पन्ताम
होरात्रास्ते कल्पन्तामर्द्धमासास्ते कल्पन्ताम्मासास्ते कल्पन्ता
मृतवस्ते कल्पन्ताँ संवत्सरस्ते कल्पताम् ॥ प्रेत्याऽएत्यै सञ्चा
ञ्च प्रसारय ॥ सुपर्णचिदसि तया देवतयाङ्गिरस्वद्ध्रुवः सीद ॥४५॥

ध्य तंस्त्वा हवामहे ॥ ३६ ॥ त्वामिह । त्वामिद्धि हवामहे सातौ वाजस्य कारवः ।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वाङ्काष्ठास्वर्वतः ॥ ३७ ॥ सत्वन्नः । सत्वन्नश्चि
त्र वज्रहस्त धृष्णुया मह स्तवानो ऽअद्रिवः ॥ गामश्वं रथ्य
मिन्द्र सङ्किर सत्रा वाजन्न जिग्युषे ॥ ३८ ॥ कया नः । कया नश्चि
त्र ऽआ भुवदूती सदावृधः सखा ॥ कया शचिष्ठया वृता ॥ ३९ ॥ क
स्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः ॥ दृढा चिदारुजे व
सु ॥ ४० ॥ अभी षु णः । अभी षु णः सखीनामविता जरितॄणाम् ॥
शतं भवास्यूतये ॥ यज्ञा यज्ञा वः । यज्ञा यज्ञा वो ऽअग्नये गिरा गिरा च ॥ य२

वस्वो बर्हिरिन्द्रꣳ सुदेवन्देवैर्वीरवत्स्तीर्णं वेद्यामवर्द्धयत्॥ वस्तोर्वृतम्प्राक्तोर्भृतꣳ
राया बर्हिष्मतोऽत्यगाद्वसुवने वसुधेयस्य वेतु यज॥१३॥ देवीर्द्वारः। देवी
र्द्वारऽइन्द्रꣳ सङ्घाते वीड्वीर्यामन्नवर्द्धयन्॥ आवत्सेन तरुणेन कुमारेण
च मीवतापार्वाणꣳ रेणुककाटन्नुदन्तां वसुवने वसुधेयस्य व्यन्तु य
ज॥१४॥ देवीऽउषासानक्ता। देवीऽउषासानक्तेन्द्रं यज्ञे प्रयत्यह्वे
ताम्॥ दैवीर्विशः प्रायासिष्टाꣳ सुप्रीते सुधिते वसुवने वसुधे य
स्य वीतां यज॥१५॥ देवी जोष्ट्री। देवी जोष्ट्री वसुधिती देवमिन्द्रमव
र्द्धताम्॥ अयाव्यन्याघा द्वेषाꣳस्यान्या वक्षद्वसु वार्याणि यजमानाय

होता यक्षत्त्वष्टारमिन्द्रम्॥ होता यक्षत्त्वष्टारमिन्द्रन्देवम्भिषजꣳ सुयजङ्घृतश्रि
स यम्॥ पुरुरूपꣳ सुरेतसम्मघोनमिन्द्राय त्वष्टा दधदिन्द्रियाणि वेत्वाज्य
स्य होतर्यज॥ ९॥ होता यक्षद्वनस्पतिꣳ शमितारम्॥ होता यक्षद्वनस्प
तिꣳ शमितारꣳ शतक्रतुन्धियो जोष्टारमिन्द्रियम्॥ मध्वा समञ्जन्प
थिभिः सुगेभिः स्वदाति यज्ञम्मधुना घृतेन वेत्वाज्यस्य होतर्यज॥ १०॥ र्य ५
होता यक्षदिन्द्रꣳ स्वाहा। होता यक्षदिन्द्रꣳ स्वाहाज्यस्य स्वाहा मेदसः स्वा
हा स्तोकानाꣳ स्वाहा स्वाहाकृतीनाꣳ स्वाहा हव्यसूक्तीनाम्॥ स्वाहा देवाऽ
आज्यपा जुषाणाऽ इन्द्रऽ आज्यस्य व्यन्तु होतर्यज॥ ११॥ देवम्बर्हिः। दे

र्थ्येहꣳ सरस्वतीडा वसुमती गृहान्वसुवने वसुधेयस्य व्यन्तु यज॥१८॥
देवऽइन्द्रः॥ देवऽइन्द्रो नराशꣳसस्त्रिवरूथस्त्रिवन्धुरो देवमिन्द्रमव
र्द्धयत्॥ शतेन शितिपृष्ठानामाहितः सहस्रेण प्रवर्त्तते मित्रावरुणेद
स्य होत्रमर्हतो बृहस्पतिस्तोत्रमश्विनाध्वर्यवं वसुवने वसुधेयस्य वे
तु यज॥१९॥ देवो देवैः॥ देवो देवैर्वनस्पतिर्हिरण्यपर्णो मधुशा
खः सुपिप्पलो देवमिन्द्रमवर्द्धयत्॥ दिवमग्रेणास्पृक्षदान्तरिक्षम्पृ
थिवीमदृꣳहीद्वसुवने वसुधेयस्य वेतु यज॥२०॥ देवम्बर्हिः॥ देवम्बर्हि
र्वारितीनान्देवमिन्द्रमवर्द्धयत्॥ स्वासस्थमिन्द्रेणासन्नमन्या बर्हीꣳ

शिक्षितेवसुवनेवसुधेयस्यवीतांयज॥१५॥देवीऽऊर्ज्जाहुती।देवीऽऊर्ज्जा
हुतीदुघेसुदुघेपयसेन्द्रमवर्द्धताम्॥इषमूर्ज्जमन्यावक्षत्सग्धिꣳ
सपीतिमन्यानवेनपूर्व्वन्दयमानेपुराणेननवमधाताम्॥ऊर्ज्जमूर्ज्जाहु
तीऽऊर्ज्जयमानेवसुवार्य्याणियजमानायशिक्षितेवसुवनेवसुधे
यस्यवीतांयज॥१६॥देवादैव्या।देवादैव्याहोतारादेवमिन्द्रमव
र्द्धताम्॥हताघशꣳसावाभार्ष्टांवसुवार्य्याणियजमानायशिक्षि
तौवसुवनेवसुधेयस्यवीतांयज॥१७॥देवीस्तिस्रः।देवीस्तिस्र
स्तिस्रोदेवीःपतिमिन्द्रमवर्द्धयन्॥अस्पृक्षद्भारतीदिवꣳरुद्रै

ऽज्यैस्य होतर्य्यजे॥२४॥ होतायक्षत्तनूनपातमुद्भिदम्॥ होतायक्षत्तनूनपात
मुद्भिदं यं गर्भमदितिर्दधे शुचिमिन्द्रं वयोधसम्॥ उष्णिहञ्छन्दऽइन्द्रि
यन्दित्यवाहङ्गांवयोदधद्वेत्वाज्यस्य होतर्य्यजे॥२५॥ होतायक्षदीडेन्य
मीडितम्॥ होतायक्षदीडेन्यमीडितं वृत्रहन्तममिडाभिरीड्यं सहः सोम
मिन्द्रं वयोधसम्॥ अनुष्टुभञ्छन्दऽइन्द्रियम्पञ्चाविङ्गांवयोदधद्वेत्वा
ऽज्यस्य होतर्य्यजे॥२६॥ होतायक्षत्सुबर्हिषम्पूषण्वन्तम्॥ होतायक्षत्सु
बर्हिषम्पूषण्वन्तममर्त्यं सीदन्तम्बर्हिषि प्रियेमृतेन्द्रं वयोधसम्॥
बृहतीञ्छन्दऽइन्द्रियन्त्रिवत्सङ्गांवयोदधद्वेत्वाज्यहोतर्य्यजे॥२७॥ स्य

स्वध्वरं व्वसुवनेव्वसुधेयस्यव्वेतुयज॥२१॥ देवोऽअग्नेः। देवोऽअग्निः
स्विष्टकृद्देवमिन्द्रमवर्द्धयत्॥ स्विष्ट [illegible] ष्टकृत्स्विष्टमद्यकरोतु नो
व्वसुवनेव्वसुधेयस्य [illegible] वेतुयज॥२२॥ अग्निमद्य। अग्निमद्यहोतार
मवृणीतायंयजमानः पचन्पक्तीः पचन्पुरोडाशंबध्नन्निन्द्राय
छागम्॥ सूपस्थाऽअद्यदेवोव्वनस्पतिरभवदिन्द्रायछागेन॥ अघ
त्तम्मेदस्तः प्रतिपचताग्रभीदवीवृधत्पुरोडाशेन॥ त्वामद्यऽऋषे॥२३॥
होतायक्षत्। होतायक्षत्समिधानम्महद्यशः सुसमिद्धंव्वरेण्यमग्नि
मिन्द्रंव्वयोधसम्॥ गायत्रीञ्छन्दऽइन्द्रियंत्र्यविङ्गांव्वयोदधद्वेत्वा

गायं निमधुरा रायेषु गीतान्यपि महोत्सवं ॥५० अतःस्थ पर्वतो देवैःसे
व्यते [illegible] नित्यशः ॥ धर्मोंजो स्तत्र देवेशो हरो भस्मांगरागवान् ॥५१
पार्वत्या सहितो नित्यं पर्वते गीतनादिते ॥ मोदिते पूजितो ध्यातः पितृ
णां परमां गतिः ॥५२ गयायां परमात्मा हि गोपतिर्दंडाहाधरः ॥ हिरण्य
वैजयन्ती माया तथानुग्रहं वर्षा मुने ॥५३ श्रीलाया हस्तिरोणह सो भस्म
कूटो गिरिर्द्युतः ॥ धर्म्मराजेन तत्रास्ते अगस्त्यः सह भार्य्यया ॥५४
अगस्त्यस्य पदे ख्यातः पिंडदो ब्रह्मलोकगः ॥ पितृभिः सह धर्म
पूज्यमानो दिवौकसैः ॥५५ अगस्त्यो भगवान् स्तवतपद्योत
र्ण ह ॥ ब्राह्मणस्तु वालभे माहात्म्यं भुवि दुर्लभं ॥५६ हे

…न्व सुवितं मम ॥ अग्ने सम्राडभि द्युम्न-
११ मभि सहऽआयच्छस्व ॥ ३८ ॥ अयमग्निः ॥ अयम-
ग्निर्गृहपतिर्गार्हपत्यः प्रजाया वसुवित्तमः ॥ अग्ने
गृहपतेभि द्युम्नमभि सहऽआयच्छस्व ॥ ३९ ॥ गृहा
मा ॥ बिभीत मा वेपध्वमूर्जं बिभ्रतऽएमसि ॥ ऊर्जं
बिभ्रद्वः सुमनाः सुमेधा गृहानेमि मनसा मोदमा

१३

112

बरेण्यम्भर्गोदेवस्याधीमहिधियोयोनःप्रचोदयात्॥३५॥शान्तम्॥१०॥परितेदूडभोरथोस्माश्नो॥ऽश्यस्नोतुविश्वतः॥येनरक्षसिदाशुषः॥३६॥भूर्भुवः
भूर्भुवःस्वःसुप्रजाःप्रजाभिःस्यांसुवीरोवीरैःसुपोषःपोषैः॥नर्यप्रजाम्मेपाहिशंस्यपशून्मेपाह्यथर्यपितुम्मेपाहि॥३७॥आगन्म॥विश्ववेदसमस्म

नः ॥६२॥ येषामध्येति ॥ प्रवसन्येषु सौमनसो बहुः ॥ गृहानुपह्व
यामते नो जानन्तु जानतः ॥६३॥ उपहूता इह ॥ गावऽउपहूताऽअ
जावयः ॥ अथोऽअन्नस्य कीलालऽउपहूतो गृहेषु नः ॥ क्षेमाय
वः शान्त्यै प्रपद्ये शिवꣳ शग्मꣳ शंयोः शंयोः ॥ ६४ ॥ प्र
घासिनो हवामहे मरुतश्च रिशादसः ॥ करम्भेण सजोष
सः ॥६५॥ यद्ग्रामे ॥ यद्ग्रामे यदरण्ये यत्सभायां यदिन्द्रि

113

114

१४

ये॥ यदेनश्शुक्रमाव्वयमिन्द्रन्तद्देवंयजामहेस्वाहा ॥ ८५ ॥ मोषूणः ॥
मोषूणाऽइन्द्रात्रपृत्सुदेवैरस्तिहिष्मातेशुष्मिन्नवयाः ॥ मह
श्चिद्यस्यमीढुषोजव्याहविष्मतोमरुतोवन्दतेगीः ॥ ८६ ॥
राम ॥

115 १७१

सहस्रवाहः सहस्रवाडमर्त्यऽउशिग्दूतश्चनोहितः। अग्निर्धिया समृ
ण्वति॥१६॥ अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे॥ देवाँ२। आ सादया
दिह॥१७॥ अजीजनो हि पवमानऽसूर्यं विधारे शक्मना पयः। गो
जीरया रंहमाणः पुरंध्या॥१८॥ विभूर्मात्रा प्रभूः पित्राश्वोऽसि ह
योऽस्यत्योऽसि मयोऽस्यर्वासि सप्तिरसि वाज्यसि वृषासि नृमणाऽअ
सि। ययुर्नामासि शिशुर्नामास्यादित्यानां पत्वान्विहि देवाऽआ
शापालाऽएतं देवेभ्योऽश्वं मेधाय प्रोक्षितं रक्षतेह रन्तिरिह रमता
मिह धृतिरिह स्वधृतिः स्वाहा॥१९॥ काय स्वाहा। कस्मै स्वाहा कतम
स्मै स्वाहा स्वाहाधिमाधीताय स्वाहा मनः प्रजापतये स्वाहा चित्तं वि

तस्मै स्वाहा । कुर्वते स्वाहा । हुताय स्वाहा ॥८॥ तत्सवितुर्वरेण्यम्भर्गो देवस्य धी
महि । धियो यो नः प्रचोदयात् ॥९॥ हिरण्यपाणिमूतये सवितारमु
पह्वये । स चेत्ता देवता पदम् ॥१०॥ देवस्य चेततः । देवस्य चेततो मही
म्प्र सवितुर्हवामहे । सुमतिं सत्यराधसम् ॥११॥ सुष्टुतिं सुम
ती वृधं सुष्टुतिं सुमतीवृधो रातिं सवितुरीमहे । प्र देवाय मती
विदे ॥१२॥ रातिं सत्पतिम्महे । रातिं सत्पतीम्महे सवितारमुपह्वये ॥
आसवन्देववीतये ॥१३॥ देवस्य सवितुः । देवस्य सवितुर्मतिम्मा
सवं विश्वदेव्यम् ॥ धिया भगम्मनामहे ॥१४॥ अग्निं स्तोमे
न बोधय समिधानो ऽ अमर्त्यम् । हव्या देवेषु नो दधत् ॥१५॥

के ऊं न्वस्मने सा वाजम्॥ शिप्रो वो नियुद्भिः शिप्रिवाभिन॥२१॥ वायो ये॥ वायो ये
ते सहस्रिणो रथासस्तेभिरागहि॥ नियुत्वान्त्सोमपीतये॥२२॥ एकया चा ए
कैच दशभिश्च स्वभूते द्वाभ्यामिष्टये विंशती च॥ तिसृभिश्च वहसे
त्रिंशता च नियुद्भिर्वायविह ता विमुञ्च॥२३॥ तव वायो॥ तव वायवृत
स्पते त्वष्टुर्जामातरद्भुत॥ अवांस्या वृणीमहे॥२४॥ अभि त्वा॥ अ
भि त्वा शूर नोनुमोऽदुग्धा इव धेनवः॥ ईशानमस्य जगतः स्वर्दृश
मीशानमिन्द्र तस्थुषः॥२५॥ न त्वावान्॥ न त्वावांश॥ अन्यो दिव्यो न
पार्थिवो न जातो न जनिष्यते॥ अश्वायन्तो मघवन्निन्द्र वाजिनो ग

राम

सुमछाँ नियुद्भिर्वायविष्टये दुरोणे॥ नि नो रयिं सुभोजसं युव
स्व नि वीरङ्गव्यमश्व्यञ्च राधः॥२७॥ आनेम आ नो नियुद्भिः
शतिनीभिरध्वरं सहस्रिणीभिरुप याहि यज्ञम्॥ वायोऽअ
स्मिंत्सवने मादयस्व यूयम्पात स्वस्तिभिः सदा नः॥२८॥ नि
युत्वांवायो॥ नियुत्वान्वायवा गह्ययं शुक्रोऽअयामि ते॥
गन्तासि सुन्वतो गृहम्॥२९॥ वायोशुक्रः। वायो शुक्रोऽअ
यामि ते मध्वोऽअग्रन्दिविष्टिषु॥ आ याहि सोमपीतये स्पा
र्हो देव नियुत्वता॥३०॥ वायुरग्रेगाः। वायुरग्रेगा यज्ञप्रीः सा

वोऽअन्नारथिरधेः।पावोऽअन्नारथिरधेः सुमेधाः श्वेतःसिषक्ति नियुता
मभिश्रीः।ते वायवे समनसो वितस्थुर्विश्वेन्नरः स्वपत्यानिचक्रुः॥२३॥रा
येनु।रायेनुयञ्जज्ञतूरोदसीमेरायेदेवीधिषणाधातिदेवम्॥अधवा
युन्नियुतःसश्चतस्वाऽउतश्वेतंवसुधितिन्निरेके॥२४॥आपोह।आपो
हयद्बृहतीर्विश्वमायन्गर्भन्दधानाजनयन्तीरग्निम्।ततोदेवानांस
मवर्त्ततासुरेकः कस्मैदेवायहविषाविधेम॥२५॥यश्चिद्।यश्चिदापोम
हिनापर्यपश्यद्दक्षन्दधानाजनयन्तीर्यज्ञम्।योदेवेष्वधिदेवऽएकऽ
आसीत्कस्मैदेवायहविषाविधेम॥२६॥प्रयाभिः।प्रयाभिर्यासिदाश्वांसं

लेऽश्वस्यातेऽश्वस्यमोषेणादुघेनयोनौऽनुषाणक्को॥ इमंस्युज्ञमवता
मध्वुरग्ने:॥१७॥ दैव्याहोतारा। दैव्याहोताराऽऊर्ध्वमध्वरन्नोऽग्नेर्जिह्वा
मभिगृणीतम्॥ कृणुतन्नः स्विष्टिम्॥१८॥ तिस्रोदेवी:। तिस्रोदेवी
र्बर्हिरेदᳪंसदन्त्विडासरस्वतीभारती॥ महीगृणाना॥१९॥ तन्नः।
तन्नस्तुरीपमद्भुतम्पुरुक्षुत्वष्टासुवीर्यम्॥ रायस्पोषंविष्यतुना
भिमस्मे॥२०॥ वनस्पतेवा। वनस्पतेवसृजाररोणस्त्मनादेवेषु॥
अग्निर्हव्यᳪंशमितासूदयाति॥२१॥ अग्नेस्वाहा। अग्नेस्वाहाकृणु
हिजातवेदऽइन्द्रायहव्यम्॥ विश्वेदेवाहविरिदञ्जुषन्ताम्॥२२॥पी

पुरुषेण। यत्पुरुषेण हविषा देवा यज्ञमतन्वत॥ वसन्तोस्यासीदाज्यं ग्रीष्म इध्मः
शरद्धविः॥१४॥ सप्तास्य॥ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः।
देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषम्पशुम्॥१५॥ यज्ञेन यज्ञम्॥ यज्ञेन यज्ञमय
जन्त देवास्तानि धर्म्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्त यत्र
पूर्वे साध्याः सन्ति देवाः॥१६॥ अद्भ्यः सम्भृतः। अद्भ्यः सम्भृतः पृथिव्यै रसाच्च
विश्वकर्मणः समवर्त्तताग्रे॥ तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य दे
वत्वमाजानमग्रे॥१७॥ वेदाहम्॥ वेदाहमेतं पुरुषं महान्तमादित्यवर्णं
तमसः परस्तात्॥ तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय॥१८॥

घ जुस्तस्माद् जायत ॥७॥ तस्मादश्वाः ॥ तस्मादश्वाऽअजायन्त ये के चोभया
दतः ॥ गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽअजावयः ॥८॥ तं यज्ञं ॥ तं यज्ञम्ब
र्हिषि प्रोक्षन्पुरुषं जातमग्रतः ॥ तेन देवाऽअयजन्त साध्याऽऋषयश्च ये ॥९॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ॥ मुखं किमस्यासीत्किम्बाहू किमूरू
पादाऽउच्येते ॥१०॥ ब्राह्मणोस्य । ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः
कृतः ॥ ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽअजायत ॥११॥ चन्द्रमा मनसः ॥ म
चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत ॥ श्रोत्राद्वायुश्च प्राणश्च मुखादग्
निरजायत ॥१२॥ नाभ्याऽआसीत् ॥ नाभ्याऽआसीदन्तरिक्षं शीर्ष्णो द्यौः स
मवर्त्तत ॥ पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२॥ अकल्पयन् ॥१३॥ य

रुष एव। पुरुषऽएवेदꣳ सर्वं यद्भूतं यच्च भाव्यम्॥ उतामृतत्वस्येशानो यदन्ने
नातिरोहति॥२॥ एतावानस्य॥ एतावानस्य महिमातो ज्यायाँश्च पूरुषः॥ पादो
स्य विश्वा भूतानि त्रिपादस्यामृतं दिवि॥३॥ त्रिपादूर्ध्वः। त्रिपादूर्ध्वऽउदैत्पुरु
षः पादोस्येहाभवत्पुनः॥ ततो विष्वङ् व्यक्रामत्साशनानशनेऽअभि॥४॥ ततो वि
राट्॥ ततो विराडजायत विराजोऽअधि पूरुषः॥ स जातोऽअत्यरिच्यत पश्चा
द्भूमिमथो पुरः॥५॥ तस्माद्यज्ञात्॥ तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदा
ज्यम्॥ पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये॥६॥ तस्माद्यज्ञात्॥
तस्माद्यज्ञात्सर्वहुतऽऋचः सामानि जज्ञिरे॥ छन्दांसि जज्ञिरे तस्मा

घ

ए वृधम् तान्तुत्तायांनन्दायतलवम्॥२०॥अग्नयेपीवानम्॥अग्नयेपीवानम्प्र
थिव्यैपीठसर्प्पिणंवायवेचाण्डालमन्तरिक्षायवंशनर्त्तिनंदिवेख
लतिंसूर्य्यायहर्य्यक्षन्नक्षत्रेभ्यःकिर्म्मिरञ्चन्द्रमसेकिलासमह्नेशु
क्लंपिङ्गाक्षंरात्र्यैकृष्णंपिङ्गाक्षम्॥२१॥अथैतानष्टौविरूपानालभतेऽति

अथैतान्

दीर्घञ्चातिह्रस्वञ्चातिस्थूलञ्चातिकृशञ्चातिशुक्लञ्चातिकृष्णञ्चातिकुल्वञ्चा
तिलोमशञ्च॥अशूद्राऽअब्राह्मणास्तेप्राजापत्याः॥मागधःपुंश्चलीकि
तवःक्लीबोऽशूद्राऽअब्राह्मणास्तेप्राजापत्याः॥२२॥१॥इतिसंहितापाठे
त्रिंशत्तमोऽध्यायः॥सहस्रशीर्षापुरुषः॥सहस्रशीर्षापुरुषःसहस्राक्षः
सहस्रपात्॥सभूमिंसर्वतस्पृत्वात्यति[illegible]ङ्गुलम्॥१॥पु

भूत्यै जागरणमभूत्यै स्वपनमार्त्यै जनवादिनं व्यृद्ध्याऽअपगल्भꣳ सꣳशराय प्रच्छि
दम्॥१७॥ अक्षराजाय कितवम्। अक्षराजाये कितवं कृतायादिनवदर्शं त्रेतायै क
ल्पिनं द्वापरायाधिकल्पिनमास्कन्दाय सभास्थाणुं मृत्यवे गोव्यच्छमन्त
काय गोघातं क्षुधे यो गां विकृन्तन्तं भिक्षमाणऽउपतिष्ठति दुष्कृताय चरकाचार्यं
पाप्मने सैलगम्॥१८॥ प्रतिश्रुत्कायाऽअर्त्तनम्॥ प्रतिश्रुत्कायाऽअर्त्तनं घो
षाय भषमन्ताय बहुवादिनमनन्ताय मूकꣳ शब्दायाडम्बराघातं महसे वीणा
वादं क्रोशाय तूणवध्ममवरस्पराय शङ्खध्मं वनाय वनपमन्यतोरण्याय
दावपम्॥१९॥ नर्माय पुंश्चलूम्॥ नर्माय पुंश्चलूꣳ हसाय कारिं यादसे
शाबल्यां ग्रामण्यं गणकमभिक्रोशकं तान्महसे वीणावादं पाणिघ्नं तू

दं
र
द६

कुलेभ्यस्त्रिष्ठिनं प्रयुद्भ्ये मानस्कृतं शीलायाञ्जनीकारीन्निर्ऋत्यै कोशकारीं यमा
यासूम् ॥१४॥ यमाय यमसूमथर्वभ्यो यमसूमथर्वभ्योऽवतोकां संवत्सराय प
र्यायिणीम्परिवत्सरायाविजातामिदावत्सरायातीत्वरीमिद्वत्सरायातिष्कद्व
रीं वत्सराय विजर्जरां संवत्सराय पलिक्नीमृभुभ्योऽजिनसन्धं साध्ये
भ्यश्चर्मम्नम् ॥१५॥ सरोभ्यो धैवरम् ॥ सरोभ्यो धैवरमुपस्थावराभ्यो दाशं
वैशन्ताभ्यो बैन्दन्नड्वलाभ्यः शौष्कलम्पाराय मार्गारमवाराय कैवर्त्तन्तीर्थेभ्य
आन्दं विषमेभ्यो मैनालं स्वनेभ्यः पर्णकं गुहाभ्यः किरातं सानुभ्यो जम्भकं
पर्वतेभ्यः किम्पूरुषम् ॥१६॥ बीभत्सायै पौल्कसम् । बीभत्सायै पौल्कसं वर्णा
य हिरण्यकारं तुलायै वाणिजम्पश्चादोषाय ग्लाविनं विश्वेभ्यो भूतेभ्यः सिध्मलं

मनुतांव्विष्ठितञ्जगत्॥सदुन्दुभेसजूरिन्द्रेणदेवैर्द्दूराद्दवीयोऽअपसेधशत्रून्॥५५॥
आक्रन्दय।आक्रन्दयबलमोजोनऽआधानिष्टनिहिदुरिताबाधमानः॥अप
प्रोथदुन्दुभेदुच्छुनाऽइतऽइन्द्रस्यमुष्टिरसिवीडयस्व॥५६॥आमूः।आमू
रजप्रत्यावर्त्तयेमाःकेतुमद्दुन्दुभिर्व्वावदीति॥समश्वपर्णाश्चरन्तिनोनरोऽस्मा
कमिन्द्ररथिनोजयन्तु॥५७॥आग्नेयःकृष्णग्रीवः।आग्नेयःकृष्णग्रीवःसा
रस्वतीमेषीबभ्रुःसौम्यःपौष्णःश्यामःशितिपृष्ठोबार्हस्पत्यःशिल्पोवैश्वदे
वऽऐन्द्रोऽरुणोमारुतःकल्माषऽऐन्द्राग्नःसंहितोऽधोरामःसावित्रोवारुणः
कृष्णऽएकशितिपात्पेत्वः॥५८॥अग्नयेनीकवते।अग्नयेनीकवतेरोहिताञ्जि

रनड्वानेधोरीमोसावित्रोपौष्णोरौद्रस्तनान्तेवैश्वदेवोपिराज्ञोनूपरोमारुतःकल्माषऽआग्नेयःकृष्णोजःसारस्वतीमेषीवारुणःपेत्वः॥६२॥अग्नयेगायत्रायाग्नयेगायत्रायत्रिवृतेराथन्तरायाष्टाकपालऽइन्द्रायत्रैष्टुभायपञ्चदशायबार्हतायैकादशकपालोविश्वेभ्योदेवेभ्योजागतेभ्यःसप्तदशेभ्योवैरूपेभ्योद्वादशकपालोमित्रावरुणाभ्यामानुष्टुभाभ्यामेकविꣳशाभ्यांवैराजाभ्याम्पयस्याबृहस्पतयेपाङ्क्तायत्रिणवायशाक्वरायचरुःसवित्रऔष्णिहायत्रयस्त्रिꣳशायरैवतायद्वादशाकपालःप्राजापत्यश्चरुरदित्यैविष्णुपत्न्यैचरुरग्नयेवैश्वानरायद्वादशाकपालोनुमत्याऽअष्टाकपालः॥६३॥

इतिसंहितापाठेएकोनत्रिं७शत्तमोध्यायः॥देवसवितः।देवसवितः प्रसुव
यज्ञं प्रसुव यज्ञपतिं भगाय॥ दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पति
तिर्वाचन्नः स्वदतु॥१॥ तत्सवितुः। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात्॥२॥ विश्वानि देव। विश्वानि देव सवितर्दुरि
तानि परा सुव॥ यद्भद्रन्तन्नऽआ सुव॥३॥ विभक्तारं हवामहे। विभक्ता
रं हवामहे वसोश्चित्रस्य राधसः॥ सवितारन्नृचक्षसम्॥४॥ ब्रह्मणे
ब्राह्मणम्। ब्रह्मणे ब्राह्मणं क्षत्राय राजन्यम्मरुद्भ्यो वैश्यन्तपसे शूद्र
न्तमसे तस्करं नारकाय वीरहणम्पाप्मने क्लीबमाक्रयायाऽअयोगूं

क्रोकामायपुंश्चलूमतिक्रुष्टायमागधम्॥५॥नृत्तायसूतं॥नृत्तायसूत
गीतायशैलूषन्धर्म्मायसभाचरन्नरिष्ठायैभीमलन्नर्म्मायरेभं हसा
यकारिमानन्दायस्त्रीषखम्प्रमदेकुमारीपुत्रम्मेधायैरथकारन्धैर्य्याय
तक्षाणम्॥६॥तपसेकौलालम्मा तपसेकौलालम्मायायैकर्म्मारं रूपायम
णिकारं शुभेवपं शरव्यायाइषुकारं हेत्यैधनुष्कारं कर्म्मणेज्याकार रं
न्दिष्टायरज्जुसर्ज्जम्मृत्यवेमृगयुमन्तकायश्वनिनम्॥७॥नदीभ्यःपौञ्जि
ष्ठमृक्षीकाभ्योनैषादम्पुरुषव्याघ्रायदुर्म्मदंगन्धर्वा
प्सरोभ्योव्रात्यम्प्रयुग्भ्यउन्मत्तंसर्प्पदेवजनेभ्योऽप्रतिपदमयेभ्यःकित

वँमीर्य्यतायाऽअकितवम्पिशाचेभ्योबिदलकारीँयातुधानेभ्यःकण्टकीकारीम्॥८॥
सन्धयेजारम्॥सन्धयेजारङ्गेहायोपपतिमार्त्यैपरिवित्तन्निर्ऋत्यैपरिविवि
दानमराद्ध्याऽएदिधिषुःपतिन्निष्कृत्यैपेशस्कारीँसञ्ज्ञानायस्मरकारी
म्प्रकामोद्यायोपसदँवर्णायानुरुधम्बलायोपदाम्॥९॥उत्सादेभ्यःकुब्जम्॥
उत्सादेभ्यःकुब्जम्प्रमुदेवामनन्द्वार्भ्यःस्रामँस्वप्नायान्धमधर्मायबधिरम्प
वित्रायभिषजम्प्रज्ञानायनक्षत्रदर्शमाशिक्षायैप्रश्निनमुपशिक्षायाऽअभि
प्रश्निनम्मर्यादायैप्रश्नविवाकम्॥१०॥अर्मेभ्योहस्तिपम्॥अर्मेभ्योह
स्तिपञ्जवायाश्वपम्पुष्ट्यैगोपालँवीर्य्यायाविपालन्तेजसेजपालमिरायैकी

नाशाङ्कु॰ लालीयसुराकारं सुद्धायेगृहपं ॥ अथयेसेविसंधं मान्यं स्थायानुक्षत्तारम् ॥१९॥
नायैक्वावीहारम् ॥ मायैदावीहारम् ॥ भायाऽअग्नेधम्बुध्वस्योवि हपायाभिषेक्ता
रं वर्षिष्ठायनाकायपरिवेष्टारं देवलोकायपेशितारं मनुष्यलोकायप्रकरितारं ॥
सर्वेभ्योलोकेभ्यःऽउपसेक्तारम् अवऽऋत्यैवधायोपमन्थितारं मेधायवासः पल्पूली
म्प्रकामायरजयित्रीम् ॥१२॥ ऋतयेस्तेनहृदयम् ॥ ऋतयेस्तेनहृदयं वैरहत्याय
पिशुनं विविक्त्यैक्षत्तारम् औपद्रष्टायानुक्षत्तारं बलायानुचरं भूम्नेपरिष्कन्दं
म्प्रियायप्रियवादिनम् अरिष्ट्याऽअश्वसादं स्वर्गायलोकायभागदुघं
वर्षिष्ठायनाकायपरिवेष्टारम् ॥१३॥ मन्यवेऽयस्तापम् ॥ मन्यवेयस्तापं क्रोधाय
निसरं योगा [illegible] क्तारं ॥ शोकायाभिसर्त्तारं क्षेमायविमोक्तारम् उत्कूलनि

ति जीमूतस्येव भवति प्रतीकं यद्वर्म्मी याति समदामुपस्थे॥ अनाविद्धया तन्वा जय
त्वँ स त्वा वर्म्मणो महिमा पिपर्त्तु॥ ३७॥ धन्वना गाः। धन्वना। धन्वनाजिञ्जये ना
म धन्वना तीव्राः समदो जयेम॥ धनुः शत्रोरपकामङ्कृणोति धन्वना सर्वाः
प्रदिशो जयेम॥ ३८॥ वक्ष्यन्तीवेदा। वक्ष्यन्तीवेदागनीगन्ति कर्णम्प्रियँ स
खायम्परिषस्वजाना॥ योषेव शिङ्क्ते वितताधि धन्वञ्ज्याऽइयँ समने पार
यन्ती॥ ३९॥ तेऽआचरन्ती। तेऽआचरन्ती समनेव योषा मातेव पुत्रम्बिभृतामु
पस्थे॥ अप शत्रून्विध्यतां संविदानेऽआर्त्नीऽइमे विष्फुरन्तीऽअमित्रान्॥ ती
॥ ४०॥ बह्वीनाम्पिता। बह्वीनाम्पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावग

134 २.२

स्या ॥ इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥४२॥ रथे तिष्ठन्।
रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः ॥ अभीशूनां महि
मानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः ॥४३॥ तीव्रान्घोषान्। तीव्रा
न्घोषान्कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः ॥ अवक्रामन्तः प्र
पदैरमित्रान्क्षिणन्ति शत्रूँ१रनपव्ययन्तः ॥४४॥ रथवाहनं हविः। रथ
वाहनं हविरस्य नाम यत्रायुधं निहितमस्य वर्म ॥ तत्रा रथमुप शग्मं स
देम विश्वाहा वयं सुमनस्यमानाः ॥४५॥ स्वादुषंसदः पितरः ॥ स्वादुषं
सदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः ॥ चित्रसेना इषुब

लाऽअमृध्राः सतोवीराऽउरवो व्रातसाहाः ॥४६॥ ब्राह्मणासः पितरः। ब्राह्म
णासः पितरः सोम्यासः शिवे नो द्यावापृथिवीऽअनेहसा। पूषा नः पातु दुरि
तादृतावृधो रक्षा माकिर्नोऽअघशंसऽईशत ॥४७॥ सुपर्णं वस्ते। सुपर्णं
वस्ते मृगोऽअस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता। यत्रा नरः सं च वि च द्र
वन्ति तत्रास्मभ्यमिषवः शर्म यंसन् ॥४८॥ ऋजीते परि। ऋजीते परि वृ
ङ्धि नोऽश्मा भवतु नस्तनूः। सोमोऽअधि ब्रवीतु नोऽदितिः शर्म यच्छतु ॥४९॥
आ जङ्घन्ति। आ जङ्घन्ति सान्वेषां जघनाँ२ उप जिघ्नते। अश्वाज
नि प्रचेतसोऽश्वान्त्समत्सु चोदय ॥५०॥ अहिरिव भोगैः। अहिरिव भोगैः

पर्य्येतिबाहुंज्यायाहेतिम्परिबाधमानः॥हस्तघ्नोविश्वावयुनानिविद्वान्पुमान्पु
माᳪंसम्परिपातुविश्वतः॥५१॥वनस्पतेवीड्वङ्गः॥वनस्पतेवीड्वङ्गोहि
भूयाऽअस्मत्सखाप्रतरणःसुवीरः॥गोभिःसन्नद्धोऽअसिवीडयस्वा
स्थातातेजयतुजेत्वानि॥५२॥दिवःपृथिव्याः।दिवःपृथिव्याःपर्य्योजऽउ
द्भृतंवनस्पतिभ्यःपर्य्याभृतᳪंसहः॥अपामोज्मानम्परिगोभिरावृतमिन्द्रस्य त
वज्रᳪंहविषारथंयज॥५३॥इन्द्रस्यवज्रः॥इन्द्रस्यवज्रोमरुतामनी
स्य कम्मित्रस्यगर्ब्भोवरुणस्यनाभिः॥सेमान्नोहव्यदातिञ्जुषाणोदेवरथप्रतिह
ग व्यागृभाय॥५४॥उपश्वासय॥उपश्वासयपृथिवीमुतद्याम्पुरुत्राते

स्वाहाकृतेनहविषापुरोगायाहिसाध्याहविरदन्तुदेवाः॥११॥यदक्रन्दः।यदक्रन्दःप्रथ
मञ्जायमानऽउद्यन्त्समुद्रादुतवापुरीषात्॥श्येनस्यपक्षाहरिणस्यबाहूउप
स्तुत्यम्महिजातन्तेऽअर्वन्॥१२॥यमेनदत्तम्॥यमेनदत्तन्त्रितऽएनमायुनग्
गिन्द्रऽएणम्प्रथमोऽअध्यतिष्ठत्॥गन्धर्वोऽअस्यरशनामगृभ्णात्सूरादश्वं
वसवोनिरतष्ट॥१३॥असियमः।असियमोऽअस्यादित्योऽअर्वन्नसित्रितोगु
ह्येनव्रतेन॥असिसोमेनसमयाविपृक्तऽआहुस्तेत्रीणिदिविबन्धनानि॥१४॥
त्रीणिते।त्रीणितऽआहुर्दिविबन्धनानित्रीण्यप्सुत्रीण्यन्तःसमुद्रे॥उते
वमेवरुणश्छन्त्स्यर्वन्यत्रातऽआहुःपरमञ्जनित्रम्॥१५॥इमातेइमातेवा

जिन्नवुमाङ्जैनानीमाशफानौ ॥ सनितुर्निधानौ ॥ अत्रीतेमद्धारैशनाऽअ
पश्यमृतस्ययाऽअभिरक्षन्तिगोपाः ॥१६॥ आत्मानन्ते। आत्मानन्तेमन
साराद्जानामवोदिवापतयन्तम्पतङ्गम् ॥ शिरोऽअपश्यम्पथिभिःसुगेभि
ररेणुभिर्जेहमानम्पतत्रि ॥१७॥ अत्रीते। अत्रीतेरूपमुत्तममपश्य
ञ्जिगीषमाणमिषऽआपदेगोः ॥ यदातेमर्त्तोऽअनुभोगमानडादिद्ग्र
सिष्ठऽओषधीरजीगः ॥१८॥ अनुत्वा। अनुत्वारथोऽअनुमर्य्योऽअर्वन्न
नुगावोनुभगःकनीनाम् ॥ अनुव्रातासस्तवसख्यमीयुरनुदेवाममिरेवी
र्य्यन्ते ॥१९॥ हिरण्यशृङ्गोयः। हिरण्यशृङ्गोयोऽअस्यपादामनोजवाऽ
अवरऽइन्द्रऽआसीत् ॥ देवाऽइदस्यहविरद्यमायन्योऽअर्वन्तम्प्रथमोऽअ

ध तिष्ठत॥२०॥ ईर्म्मान्तासः। सिलिकमध्यमासः। ईर्म्मान्तासः सिलिकमध्यमा
सः। संशूरणासो दिव्यासोऽअत्याः॥ हंसाऽइव श्रेणिशो यतन्ते यदा
क्षिषुर्दिव्यमज्ममश्वाः॥२१॥ तव शरीरं। तव शरीरं पतयिष्ण्वर्वन्
तव चित्तं वातऽइव ध्रजीमान्। तव शृङ्गाणि विष्ठिता पुरुत्रारण्येषु जर्भु
राणा चरन्ति॥२२॥ उप प्रा। उप प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा
दीध्यानः। अजः पुरो नीयते नाभिरस्यानु पश्चात्कवयो यन्ति रेभाः॥२३॥ उ
प प्रा। उप प्रागात्परमं यत्सधस्थमर्वां२॥ अच्छा पितरं मातरं च॥ अद्या
देवाञ्जुष्टतमो हि गम्याऽअथा शास्ते दाशुषे वार्य्याणि॥२४॥ समिद्धोऽअ

140 २.१८

द्या । समिद्धोऽअद्य मनुषो दुरोणे देवो देवान्यजसि जातवेदः ॥ आ च वह मित्र
महश्चिकित्वान्त्वन्दूतः कविरसि प्रचेताः ॥२५॥ तनूनपात्पथः ॥१६०॥ तनूनपात्पथऽऋतस्य यानान्मध्वा समञ्जन्त्स्वदया सुजिह्व ॥ मन्मानि धीभिरुत
यज्ञमृन्धन्देवत्रा च कृणुह्यध्वरन्नः ॥२६॥ नराशंसस्य महिमानमान
राशंसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः ॥ ये सुक्रतवः
शुचयो धियन्धाः स्वदन्ति देवाऽउभयानि हव्या ॥२७॥ आजुह्वानऽई
ड्यः । आजुह्वानऽईड्यो वन्द्यश्चायाह्यग्ने वसुभिः सजोषाः ॥ त्वन्देवानाम
सि यह्व होता सऽएनान्यक्षीषितो यजीयान् ॥२८॥ प्राचीनम्बर्हिः । प्राचीन

म्बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते ऽअग्रे ऽअह्नाम् । व्यु प्रथते वितरं
वरीयो देवेभ्यो ऽअदितये स्योनम् ॥२९॥ व्यचस्वतीरुर्विया । व्यचस्वतीरु
र्विया वि श्रयन्तां पतिभ्यो न जनयः शुम्भमानाः । देवीर्द्वारो बृहतीर्वि
श्वमिन्वा देवेभ्यो भवत सुप्रायणाः ॥३०॥ आ सुष्वयन्ती । आ सुष्वयन्ती य
जते ऽउपाके ऽउषासानक्ता सदतां नि योनौ । दिव्ये योषणे बृहती सुरु
क्मे ऽअधि श्रियं शुक्रपिशं दधाने ॥३१॥ दैव्या होतारा । दैव्या होतारा प्र
थमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै । प्रचोदयन्ता विदथेषु कारू प्राची
नं ज्योतिः प्रदिशा दिशन्ता ॥३२॥ आ नः । आ नो यज्ञं भारती तूयमेत्विडा

142 २१९

मनुष्वदिहचेतयन्ती॥तिस्रोदेवीर्ब्बर्हिरिदꣳस्योनꣳसरस्वतीस्वपसःसदन्तु॥३३॥
यऽइमे॥यऽइमेद्यावापृथिवीजनित्रीरूपैरपिꣳशद्भुवनानिविश्वा॥तमद्य
होतरिषितोयजीयान्देवन्त्वष्टारमिहयक्षिविद्वान्॥३४॥उपावसृजत्मन्
न्या।उपावसृजत्मन्न्यासमञ्जन्देवानाम्पाथऽऋतुथाहवीꣳषि।वनस्पतिःशमितादेवोऽअग्निःस्वदन्तुहव्यम्मधुनाघृतेन॥३५॥सद्योजा
तः।सद्योजातोव्यमिमीतयज्ञमग्निर्देवानामभवत्पुरोगाः॥अस्यहोतुःप्रदि
श्यृतस्यवाचिस्वाहाकृतꣳहविरदन्तुदेवाः॥३६॥केतुङ्कृण्वन्।केतुङ्कृण्वन्नके
तवेपेशोमर्य्याऽअपेशसे॥समुषद्भिरजायथाः॥३७॥जीमूतस्यवभव

तु देवान्॥ अनु त्वा सप्ते प्रदिशः सचन्ताᳬ स्वधामस्मै यजमानाय धेहि॥२॥ ई
ड्यश्चाईड्यश्चासि वन्द्यश्च वाजिन्नाशुश्चासि मेध्यश्च सप्ते॥ अग्निष्ट्वा
दे वैर्वसुभिः सजोषाः प्रीतं वह्निं वहतु जातवेदाः॥३॥ स्तीर्णं बर्हिः। स्ती
र्णं बर्हिः सुष्टरीमा जुषाणोरु पृथु प्रथमानं पृथिव्याम्॥ देवेभिर्युक्तम
दितिः सजोषाः स्योनं कृण्वाना सुविते दधातु॥४॥ एताऽउ वः। एताऽउ वः सुभ
गा विश्वरूपा वि पक्षोभिः श्रयमाणाऽउदातैः॥ ऋष्वाः सतीः कवषः शुम्भ
माना द्वारो देवीः सुप्रायणा भवन्तु॥५॥ अन्तरा मित्रावरुणा। अन्तरा मित्रा
वरुणा चरन्ती मुखं यज्ञानामभि संविदाने॥ उषासा वाᳬ सुहिरण्ये सुशि

ल्यैऽऋतस्य योनौ विह सादयामि ॥ ६ ॥ प्रथमा वाम् । प्रथमा वाꣳ सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा ॥ अपिप्रयुञ्चोदना वाम्मिमाना होतारा ज्ज्योतिः प्रदिशा दिशन्ता ॥ ७ ॥ आदित्यैर्न्नः । आदित्यैर्न्नो भारती वष्टु यज्ञꣳ सरस्वती सह रुद्रैर्न्नऽआवीत् ॥ इडोपहूता वसुभिः सजोषा यज्ञन्नो देवीरमृतेषु धत्त ॥ ८ ॥ त्वष्टा वीरम् । त्वष्टा वीरन्देवकामञ्जजान त्वष्टुरर्वा जायतऽआशुरश्वः । त्वष्टेदं विश्वम्भुवनञ्जजान बहोः कर्त्तारमिह यक्षि होतः ॥ ९ ॥ अश्वो घृतेन । अश्वो घृतेन त्मन्या समक्तऽउप देवाꣳ२॥ ऋतुशः पाथऽएतु । वनस्पतिर्द्देवलोकम्प्रजानन्नग्निना हव्या स्वदितानि वक्षत् ॥ १० ॥ प्रजापतेस्तपसा । प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने ॥

१४५

गस्या छन्दसेन्द्रियꣳ शुष्ममिन्द्रे वयो दधद्वसुवने वसुधेयस्य व्यन्तु यज ॥४१॥
देवो नराशꣳसः। देवो नराशꣳसो देवमिन्द्रं वयोधसं देवो देवमवर्द्धयत् ॥
विराजा छन्दसेन्द्रियꣳ रूपमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥४२॥
देवो वनस्पतिः। देवो वनस्पतिर्देवमिन्द्रं वयोधसं देवो देवमवर्द्धयत् ॥ द्वि
पदा छन्दसेन्द्रियं भगमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥४३॥
देवम्बर्हिः। देवम्बर्हिर्वारितीनां देवमिन्द्रं वयोधसं देवं देवमवर्द्धयत् ॥ ककु
भा छन्दसेन्द्रियं यशऽइन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥४४॥
देवोऽअग्निः। देवोऽअग्निः स्विष्टकृद्देवमिन्द्रं वयोधसं देवो देवमवर्द्धयत् ॥

अतिछन्दसा छन्दसेन्द्रियं द्युः त्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥४५॥
अग्निमद्याग्निमद्य होतारमवृणीतायं यजमानः पचन्पक्तीः पचन्पु
रोडाशं बध्नन्निन्द्राय वयोधसे छागम् ॥ सूपस्था ऽअद्य देवो वनस्प
तिरभवदिन्द्राय वयोधसे छागेन ॥ अघत्तं मेदस्तः प्रतिपचताग्रभीद
वीवृधत्पुरोडाशेन ॥ त्वामद्य ऋषे ॥४६॥ इति संहितापाठे अष्टाविंशो
ऽध्यायः ॥ समिद्धो ऽअञ्जन् ॥ समिद्धो ऽअञ्जन्कृदरं मतीनां घृतमग्ने
मधुमत्पिन्वमानः ॥ वाजी वहन्वाजिनं जातवेदो देवानां वक्षि प्रियमास
धस्थम् ॥१॥ घृतेनाञ्जन् ॥ घृतेनाञ्जन्त्सम्पथो देवयानान्प्रजानन्वाज्यप्ये

यस्सरस्वतीस्तिस्रः होतायक्षत्सरस्वतीस्तिस्रो देवीर्हिरण्ययीर्भारतीर्बृ
हतीर्महीः पतिमिन्द्रं वयोधसम्॥ विराजञ्छन्द इहेन्द्रियं धेनुङ्गान्न व
योदधद्व्यन्त्वाज्यस्य होतर्यज॥२१॥ होतायक्षत्सुरेतसन्त्वष्टारम्। होतायक्ष
त्सुरेतसन्त्वष्टारम्पुष्टिवर्द्धनं रूपाणिबिभ्रतम्पृथक्पुष्टिमिन्द्रं वयोध
सम्॥ द्विपदञ्छन्द इन्द्रियमुक्षाणङ्गान्नवयोदधद्वेत्वाज्यस्य होतर्य
ज॥२२॥ होतायक्षद्वनस्पतिं शमितारम्। होतायक्षद्वनस्पतिं शमिता
रं शतक्रतुं हिरण्यपर्णमुक्थिनं रशनाम्बिभ्रतं वशिम्भगमिन्द्रं वयो
धसम्॥ ककुभञ्छन्द इहेन्द्रियं वशां वेहतङ्गां वयोदधद्वेत्वाज्यस्य होतर्य

होता यक्षद्द्वारे स्वतीः सुप्रायणाः । होता यक्षद्द्वारे स्वतीः सुप्रायणाऽ ऋतावृधो
द्वारो देवी र्हिरण्ययी र्ब्रह्माणमिन्द्रं वयोधसम् ॥ पङ्क्तिं छन्दऽ इहेन्द्रिय
न्तुर्य्यवाहं गां वयो दध द्व्यन्त्वाज्यस्य होतर्य्यज ॥२८॥ होता यक्षत्सुपेशसा सु
शिल्पे । होता यक्षत्सुपेशसा सुशिल्पे बृहती ऽ उभे नक्तोषासा न दर्शते
विश्वमिन्द्रं वयोधसम् ॥ त्रिष्टुभं छन्दऽ इहेन्द्रियं पष्ठवाहं गां वयो दधद्वी
तामाज्यस्य होतर्य्यज ॥२९॥ होता यक्षत्प्रचेतसा देवानाम् । होता यक्षत्प्र
चेतसा देवानामुत्तमं यशो होतारा दैव्या कवी सयुजेन्द्रं वयोधसम् ॥ जगती
छन्दऽ इन्द्रियमनड्वाहं गां वयो दधद्वीतामाज्यस्य होतर्य्यज ॥३०॥ होता

२०९४

मिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥ २७ ॥ देवी जोष्ट्री देवी जोष्ट्री
वसुधिती देवमिन्द्रं वयोधसं देवी देवमवर्द्धताम् ॥ बृहत्या छन्दसेन्द्रियं श्रो
त्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥ २८ ॥ देवीऽऊर्ज्जाहुती
देवीऽऊर्ज्जाहुती दुघे सुदुघे पयसेन्द्रं वयोधसं देवी देवमर्द्धताम् ॥ पङ्क्त्या व
छन्दसेन्द्रियं शुक्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥ २९ ॥
देवा दैव्या ॥ देवा दैव्या होतारा देवमिन्द्रं वयोधसं देवौ देवमवर्द्धताम् ॥ त्रिष्टुभा
छन्दसेन्द्रियं त्विषिमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥ ३० ॥
देवीस्तिस्रः ॥ देवीस्तिस्रस्तिस्रो देवीर्वयोधसं पतिमिन्द्रमवर्द्धयन् ॥ जग

जा॥१३॥होतायक्षत्स्वाहाकृतीरग्निम्॥होतायक्षत्स्वाहाकृतीरग्निंगृहपतिम्पृथग्व
रुणम्भेषजङ्कविंक्षत्रमिन्द्रंवयोधसम्॥अतिछन्दसञ्छन्दइन्द्रियम्बृ
हदृषभङ्गांवयोदधद्व्यन्त्वाज्यस्यहोतर्यज॥१४॥देवम्बर्हिः॥देवम्बर्हिर्व
योधसन्देवमिन्द्रमवर्द्धयत्॥गायत्र्याछन्दसेन्द्रियञ्चक्षुरिन्द्रेवयोदध
द्वसुवनेवसुधेयस्यवेतुयज॥१५॥देवीर्द्वारः॥देवीर्द्वारोवयोधसꣳशु
चिमिन्द्रमवर्द्धयन्॥उष्णिहाछन्दसेन्द्रियम्प्राणमिन्द्रेवयोदधद्वसु
वनेवसुधेयस्यव्यन्तुयज॥१६॥देवीऽउषासानक्ता॥देवीऽउषासान
क्तादेवमिन्द्रंवयोधसन्देवीदेवमवर्द्धताम्॥अनुष्टुभाछन्दसेन्द्रियम्बल

१५१

सि॥१॥युञ्जतेमनः॥युञ्जतेमनऽउतयुञ्जतेधियोविप्राविप्रस्यबृहतोवि
पश्चितः॥विहोत्रादधेवयुनाविदेकऽइन्महीदेवस्यसवितुःपरिष्टुतिः॥२॥
देवीद्यावापृथिवी॥देवीद्यावापृथिवीमखस्यवामद्यशिरोराध्यासन्देवय
ख४ जनेपृथिव्याः॥मखायत्वामखस्यत्वाशीर्ष्णे॥३॥देव्योवम्र्यः॥देव्योवम्र्योभू
म तस्यप्रथमजामखस्यवोद्यशिरोराध्यासन्देवयजनेपृथिव्याः॥मखा
यत्वामखस्यत्वाशीर्ष्णे॥४॥इयत्यग्रे॥१९००॥कल्पिकाशतं॥इयत्यग्र
आसीन्मखस्यतेद्यशिरोराध्यासन्देवयजनेपृथिव्याः॥मखायत्वामख
स्यत्वाशीर्ष्णे॥५॥इन्द्रस्यौजः॥इन्द्रस्यौजस्थमखस्यवोद्यशिरोराध्यास

न्देवयजने पृथिव्याः॥ मखाय त्वा मखस्य त्वा शीर्ष्णे॥ मखाय त्वा मखस्य त्वा शीर्ष्णे॥
मखाय त्वा मखस्य त्वा शीर्ष्णे॥ ६॥ प्रैतु॥ प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सू
नृता॥ अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः॥ मखाय त्वा मखस्य
त्वा शीर्ष्णे॥ मखाय त्वा मखस्य त्वा शीर्ष्णे॥ मखाय त्वा मखस्य त्वा शीर्ष्णे॥ ७॥
मखस्य शिरः॥ मखस्य शिरोऽसि। मखाय त्वा मखस्य त्वा शीर्ष्णे॥ मख
स्य शिरोऽसि॥ मखाय त्वा मखस्य त्वा शीर्ष्णे॥ मखस्य शिरोऽसि॥ मखाय
त्वा मखस्य त्वा शीर्ष्णे॥ मखाय त्वा मखस्य शीर्ष्णे॥ मखाय त्वा मखस्य त्वा
शीर्ष्णे॥ मखाय त्वा मखस्य त्वा शीर्ष्णे॥ ८॥ अश्वस्य त्वा॥ अश्वस्य त्वा वृ
ष्णः शक्ना धूपयामि देवयजने पृथिव्याः॥ मखाय त्वा मखस्य त्वा शी

नवृषणमाण्डाभ्यामादित्यांश्मश्रुभिःपन्थानम्भ्रूभ्यान्द्यावापृथिवीवर्त्तो
भ्यांविद्युतङ्कनीनकाभ्यांशुक्लायस्वाहाकृष्णायस्वाहापार्याणि
पक्ष्माण्यवार्याइक्षवोवार्याणिपक्ष्माणिपार्याइक्षवः॥१॥वा
तम्प्राणेनाबातम्प्राणेनापानेननासिकेऽउपयाममधरेणौष्ठेनस
दुत्तरेणप्रकाशेनान्तरमनूकाशेनबाह्यन्निवेष्यम्मूर्ध्नास्तनयि
त्नुन्निर्बाधेनाशनिम्मस्तिष्केणविद्युतङ्कनीनकाभ्याङ्कर्णाभ्यांश्रो
त्रंश्रोत्राभ्याङ्कर्णौतेदनीमधरकण्ठेनापःशुष्ककण्ठेनचित्तम्मन्या
भिरदितिंशीर्ष्णानिर्ऋतिन्निर्जर्जल्पेनशीर्ष्णासंक्रोशैःप्रा

लान्त्रैर्मालꣳ स्तुपेन॥२॥ मशकान्केशैः। मशकान्केशैरिन्द्रꣳ स्वपसाव
हेन बृहस्पतिꣳ शकुनिसादेन कूर्म्माञ्छफैराक्रमणꣳ स्थूराभ्यामृ
क्षलाभिः कपिञ्जलाञ्जवं जङ्घाभ्यामध्वानं बाहुभ्यां जाम्बीलेनार
ण्यमग्निमतिरुग्भ्यां पूषणं दोर्भ्यामश्विनावꣳसाभ्याꣳ रुद्रꣳ रोरा
भ्याम्॥३॥ अग्नेः पक्षतिः। अग्नेः पक्षतिर्वायोर्निपक्षतिरिन्द्रस्य तृती
या सोमस्य चतुर्थ्यदित्यै पञ्चमीन्द्राण्यै षष्ठी मरुताꣳ सप्तमी बृ
हस्पतेरष्टम्यर्य्यम्णो नवमी धातुर्दशमीन्द्रस्यैकादशी वरुण
स्य द्वादशी यमस्य त्रयोदशी॥४॥ इन्द्राग्न्योः पक्षतिः। इन्द्राग्न्योः पक्ष
तिः सरस्वत्यै निपक्षतिर्मित्रस्य तृतीयापां चतुर्थी निर्ऋत्यै पञ्चम्य

पारस्वादिभ्यैवाल्यकः॥२५॥ एण्यढ्कः। एण्यडको मण्डूको मूषिका तित्ति
रिस्ते सर्पाणांल्लोपाराऽऽश्विनः कुष्ठोरान्धाऽऽरूक्षो जतूः सुषि
लीकातऽइतरजनानाञ्जहकाबै ह्लवी॥२६॥ अन्यवापोर्द्धमासाना
म्राश्रन्यवापोर्द्धमासानामरश्यो मधुरः सुपर्णस्तेगन्धर्वाणां म
पामुद्गोमासाढ्कः श्यपौरोहितकुण्डूणाची गोलत्तिकातेपसरसा
म्मत्स्य वैसितः॥२७॥ वर्षाहरूतुनामा वर्षाहरूतुनामा खुः करो
मान्यालस्तेपितॄणाम्बलायाजगरो वृसनाढ्कः पिञ्जलः कपोतऽ
लूलूकः शशास्तेनिऋत्यै वरुणायारण्यो मेषः॥२८॥ श्वित्रऽआदि

दित्यानाम्मां ष्श्वित्रः ऽ आदित्यानामुष्ट्रो घृणीवान्वार्ध्रीनसस्ते मत्या
अरण्याय सृमरो रुरू रौद्रः क्वयिः कुटरु र्दात्यौहस्ते वाजिना
ङ्कामाय पिकः ॥ ३९ ॥ खड्गो वैश्वदेवः । खड्गो वैश्वदेवः श्वा कृष्णः क
र्णो गर्द्दभस्तरक्षुस्ते रक्षसामिन्द्राय सूकरः सिंहो मारुतः कृकला
सः पिप्पका शकुनिस्ते शरव्यायै विश्वेषान्देवानाम्पृषतः ॥ ४० ॥ इ
ति संहितापाठे चतुर्विंशतिमोध्यायः ॥ शादन्दद्भिः । शादन्दद्भिर
वकान्दन्तमूलैर्मृदम्बर्स्वैस्तेगान्दंष्ट्राभ्यां सरस्वत्या ऽ अग्रजि
ह्वञ्जिह्वायाऽ उत्सादमवक्रन्देन तालु वाजं हनुभ्यामप ऽ आस्ये

पतये पुरुषान्हस्तिन ऽआलभते वाचे प्लुषीँश्चक्षुषे मशकाञ्छ्रोत्राय भृङ्गाः ॥
प्रजापतये च ॥२९॥ प्रजापतये च वायवे च गोमृगो वरुणायारण्यो
मेषो यमाय कृष्णो मनुष्यराजाय मर्कटः शार्दूलाय रोहिदृषभाय
गवयी क्षिप्रश्येनाय वर्त्तिका नीलङ्गोः कृमिः समुद्राय शिशुमा
रो हिमवते हस्ती ॥३०॥ मयुः प्राजापत्यः ॥ मयुः प्राजापत्य ऽउलो ह
लिक्ष्णो वृषदंशस्ते धात्रे दिशां कङ्को धुङ्क्षाग्नेयी कलविङ्को लोहि
ताहिः पुष्करसादस्ते त्वाष्ट्रा वाचे क्रुञ्चः ॥३१॥ सोमाय कुलुङ्गः ॥ सो
माय कुलुङ्ग ऽआरण्योऽजो नकुलः शका ते पौष्णाः क्रोष्टा मायोरि

158 ९२

न्द्रस्य गौरमृगः पिद्वो न्यङ्कुः कक्कटस्तेऽनुमत्यै प्रतिश्रुत्कायै चक्रवाकः ॥३२॥
सौरी बलाका । सौरी बलाका शार्गः सृजयः शयाण्डकस्ते मैत्राः सरस्व
त्यै शारिः पुरुषवाक् श्वाविद् भौमी शार्दूलो वृकः पृदाकुस्ते मन्यवे सरस्व
ते शुकः पुरुषवाक् ॥३३॥ सुपर्णः पार्जन्यः । सुपर्णः पार्जन्य आ
तिर्वाहसो दार्विदा ते वायवे बृहस्पतये वाचस्पतये पैङ्गराजोऽलज आन्त
रिक्षः प्लवो मद्गुर्मत्स्यस्ते नदीपतये द्यावापृथिवीयः कूर्मः ॥३४॥ पुरु
षमृगश्चन्द्रमसः । पुरुषमृगश्चन्द्रमसो गोधा कालका दार्वाघाटस्ते व
नस्पतीनां कृकवाकुः सावित्रो हंसो वातस्य नाक्रो मकरः कुलीपयस्तेऽकू

इडाभिर्व्विदथे सुशस्तिर्व्विश्वानरः सविता देवऽएतु॥ अपि यथा युवानो
मत्सथा नो विश्वञ्जगदभिपित्वे मनीषा॥ ३४॥ यदद्य॥ यदद्य कच्च वृ
त्रहन्नुदगाऽअभि सूर्य्य॥ सर्व्वन्तदिन्द्र ते वशे॥ ३५॥ तरणिर्व्विश्वदर्श
तः॥ तरणिर्व्विश्वदर्शतो ज्योतिष्कृदसि सूर्य्य॥ विश्वमाभासि रो
चनम्॥ ३६॥ तत्सूर्य्यस्य॥ तत्सूर्य्यस्य देवत्वन्तन्महित्वम्मध्या कर्त्तो
र्व्विततं सञ्जभार॥ यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते
सिमस्मै॥ ३७॥ तन्मित्रस्य॥ तन्मित्रस्य वरुणस्याभिचक्षे सूर्य्यो रू
पङ्कृणुते द्योरुपस्थे॥ अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः

इमान्ते धियम्प्रभरे महो महीमस्य स्तोत्रे धिषणा यत्त ऽआनजे ॥ तमुत्स
वे च प्रसवे च सासहिमिन्द्रन्देवासः शवसामदन्ननु ॥२७॥ विश्वा दृह
ह ॥ विश्वा दृह स्ति बत्सोम्यपम्म ह्वा सुद्धुध घृह्णपताव विकृतम् ॥ वा
तजूतो यो ऽअभि रक्षति त्मनां प्रजाः पुपोष पुरुधा विराजति ॥३०॥
उदु त्यम् ॥ उदु त्यञ्जातवेदसन्देवं वहन्ति केतवः ॥ दृशे विश्वाय सूर्य
म् ॥३१॥ येनो पावक । येना पावकचक्षसा भुरण्यन्तञ्जनाँ ॥ अनु ॥ त्वं
वरुण पश्यसि ॥३२॥ दैव्यावध्वर्यू ऽआगतं रथेन सूर्यत्वचा ॥ मध्वा य
ज्ञं समञ्जाथे ॥ तम्प्रत्नथायं वेनश्चित्रन्देवानाम् ॥३३॥ आनेः ॥ आनेऽ

वि

सुत्रामाणमिमे सोमाः सुरामाणो गच्छन्त्विन्द्रं मेषैर्वृषभैः सुताः श्रा
ष्पैस्तोक्मभिर्लाजैर्महस्वन्तो मदा मासरेण परिष्कृताः शुक्राः
पयस्वन्तोऽमृताः प्रस्थिता वो मधुश्चुतस्तानश्विना सरस्वतीन्द्रः सु
त्रामा वृत्रहा जुषन्तां सोम्यम्मधु पिबन्तु मदन्तु व्यन्तु होतर्यज॥
॥४२॥ होता यक्षदश्विनौ छागस्य। हविष आत्तामद्य मध्यतो मे
दऽउद्भृतम्पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभो घस्तान्नूनं घासेऽ
अज्राणां यवसप्रथमानां सुमत्क्षराणां शतरुद्रिया
णामग्निष्वात्तानां पीवोपवसनानां पार्श्वतः श्रोणितः शिताम

त उत्सादतोऽङ्गादङ्गादवत्तानां करत ऽएवाश्विना जुषेतां हविर्होतर्
यज ॥ [illegible] ॥ होता यक्षत्सरस्वतीं मेषस्य हविष ऽआवयदद्य म
ध्यतो मेद ऽउद्भृतम्पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभो घस्तन्नूनं घा
से ऽअज्राणां यवसप्रथमानां सुमत्क्षराणां शतरुद्रिया
णामग्निष्वात्तानां पीवोपवसनानां पार्श्वतः श्रोणितः शितामत ऽ
उत्सादतोऽङ्गादङ्गादवत्तानां करदेवं सरस्वती जुषतां हविर्होत
र्यज ॥ [illegible] ॥ होता यक्षदिन्द्रमृषभस्य हविष ऽआवयदद्य मध्यतो
मेद ऽउद्भृतम्पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभो घस्तन्नूनं घा
से ऽअज्राणां यवसप्रथमानां सुमत्क्षराणां शतरुद्रि

सिषामिन्द्रो युवा सखा ॥२४॥ इन्द्रेहि ॥ इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः ॥
महाँ२॥ अभिष्टिरोजसा ॥२५॥ इन्द्रो वृत्रमा२॥ इन्द्रो वृत्रमवृणोच्छर्द्धनीतिः प्र
मायिनाममिनाद्वर्प्पणीतिः ॥ अहन्व्यंसमुशधग्वनेष्वाविर्द्धेना ऽ अकृणो
द्राम्याणाम् ॥२६॥ कुतस्त्वमा२॥ कुतस्त्वमिन्द्र माहिनः सन्नेको यासि सत्पते कि
न्त ऽ इत्था ॥ सम्पृच्छसे समराणः शुभानैर्वोचेस्तन्नो हरिवो यत्ते ऽ अस्मे ॥
महाँ२॥ इन्द्रो अ ऽ ओ२ जसा कुदा चुनस्तरीरसि कुदा चुन प्रयुच्छसि ॥२७॥
आ तत्॥ आ तत्त ऽ इन्द्रायवः पनन्ताभि य ऽ ऊर्वं गोमन्तन्तितृत्सान् ॥ स
कृत्स्वं ये पुरुपुत्राम्महीं सहस्रधारां बृहतीन्दुदुक्षन् ॥२८॥ इमा न्ते ॥

ह्विवाजान्॥१८॥गावुऽउप।गावुऽउपावतावु तंम्महीयुज्ञस्यरप्सुदा॥उताकर्णा हि
रण्यया॥१९॥यदृद्य।यदृद्यसूरुउदितेनोगामित्रोऽअर्यमा॥सुवातिस
वितासगः॥२०॥आसुत।आसुतेसिञ्चतश्रियंरोदस्योरभिश्रियम्॥रसा
दधीतवृषभम्॥तम्प्रत्नथायंवेनः॥२१॥आतिष्ठन्तम्परि।आतिष्ठन्तम्परिवि
र विश्वेऽअभूषञ्छ्रियोवसानश्चरतिस्वरोचिः।महत्तद्वृष्णोऽअसुरस्यनाम॥
विश्वरूपोऽअमृतानितस्थौ॥२२॥प्रवः।प्रवोमहेमन्दमानायान्धसोऽर्चाविश्वा
नरायविश्वाभुवे॥इन्द्रस्ययस्यसुमखंसहोमहिश्रवोनृम्णञ्चरोद
सीसपर्यतः॥२३॥बृहन्निद्।बृहन्निदिध्मऽएषांभूरिशास्त्रम्पृथुःस्वरुः॥

164

यस्य घवीनो जनानाम्मुद्यो न्दयन्तु गोनाम्॥१४॥ श्रुध्रि(यि)श्रुत्कर्ण। श्रुधिश्रुत्कर्ण
वह्निभिर्द्देवैरग्ने सयावभिः॥ आसीदन्तु बर्हिषि मित्रो ऽअर्य्यमा प्रातर्य्यावा
णो ऽअध्वरम्॥१५॥ विश्वेषामदितिः॥ विश्वेषामदितिर्य्यज्ञियानां वि
श्वेषामतिथिर्म्मानुषाणाम्॥ अग्निर्द्देवानामव ऽआवृणानः सुमृडीको
भवतु जातवेदाः॥१६॥ महो ऽअग्नेः॥ महो ऽअग्नेः समिधानस्य शर्म्मण्य
नागा मित्रे वरुणे स्वस्तये॥ श्रेष्ठे स्याम सवितुः सवीमनि तद्देवानामवो (ऽअद्या)
वृणीमहे॥१७॥ आपश्चित्॥ आपश्चित्पिप्युस्तर्य्यो न गावो नक्षन्नृतञ्जा
रितारस्त ऽइन्द्र॥ याहि वायुर्न्न नियुतो नो ऽअच्छा त्वं हि धीभिर्द्दयसे

विएास्युर्विपुन्यया॥ सामिंद्रः शुक्र ऽआहुतः॥९॥ विश्वेभिः सोम्यम्॥ विश्वे
भिः सोम्यम्मध्वग्नऽइन्द्रेण वायुना॥ पिबा मित्रस्य धामभिः॥१०॥ आयहा॥ बा
आयाहि षेन्नृपतिन्तेजऽआनट् शुचिरेतो निषिक्तन्द्योरभीके॥ अग्निः शर
र्द्धमनवद्यं युवानं स्वाध्यञ्जनयत्सूदयञ्च॥११॥ अग्ने शर्द्ध॥ अग्ने शर
र्द्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु॥ सञ्जास्पत्यं सुयममा
कृणुष्व शत्रूयतामभितिष्ठा महांसि॥१२॥ त्वां हि॥ त्वां हि मन्द्रतमम र्क
शोकैर्ववृमहे महि नः श्रोष्यग्ने॥ इन्द्रन्न त्वा शवसा देवता वायुम्पृणन्ति राधसा ण
नृतमाः॥१३॥ त्वेऽअग्ने॥ त्वेऽअग्ने स्वाहुत प्रियासः सन्तु सूरयः॥ यन्तारो

विरूपाद्वे विरूपे चरतः स्वर्थेऽअन्यान्या वत्समुपधापयेते॥ हरिरन्यस्यां
भवति स्वधावाँ३ शुक्रोऽअन्यस्यां ददृशे सुवर्चाः॥५॥ अयमिहा॥१०॥
अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठोऽअध्वरेष्वीड्यः॥ यमप्नवा
नो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशे विशे॥६॥ त्रीणि शता त्री णि शा
ता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन्॥ औक्षन्घृतैरस्तृणन्ब
र्हिरस्मा३ऽआदिद्धोतारं न्यसादयन्त॥ मूर्द्धानं दिवः॥ मूर्द्धानं दिवोऽअरतिं
पृथिव्या वैश्वानरमृतऽआ जातमग्निम्॥ कविं सम्राजमतिथिं जनाना
मासन्नापात्रं जनयन्त देवाः॥८॥ अग्निर्वृत्राणि॥ अग्निर्वृत्राणि जङ्घनद्

पु
पं
वै

युश्च मेधान्धाता ददातु मे स्वाहा ॥१५॥ इदम्मे । इदम्मे ब्रह्म च क्षत्रञ्चोभे श्रियमश्नुताम् ॥ मयि देवा दधतु श्रियमुत्तमान्तस्यै ते स्वाहा ॥१६॥ इति संहिता पाठे द्वात्रिंशत्तमोध्यायः ॥ अस्याजरासः ॥ अस्याजरासो दमामरित्राऽअर्चद्धूमासोऽअग्नयः पावकाः ॥ श्वितीचयः श्वात्रासो भुरण्यवो वनर्षदो वायवो न सोमाः ॥१॥ हरयो धूमकेतवः ॥ हरयो धूमकेतवो वातजूताऽउप द्यवि ॥ यतन्ते वृथगग्नयः ॥२॥ यजा नः । यजा नो मित्रावरुणा यजा देवाँ२॥ ऋतम्बृहत् ॥ अग्ने यक्षि स्वन्दमम् ॥३॥ युक्ष्वा हि ॥ युक्ष्वा हि देवहूतमाँ२॥ अश्वाँ२॥ अग्ने रथीरिव ॥ नि होता पूर्व्यः सदः ॥४॥ इदं

नामि वेद भुवनानि विश्वा॥ यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरय
न्त॥१०॥ परीत्य भूतानि॥ परीत्य भूतानि परीत्य लोकान्परीत्य सर्वाः प्र
दिशो दिशश्च॥ उपस्थाय प्रथमजामृतस्यात्मनात्मानमभि संविवेश॥
॥११॥ परि द्यावापृथिवी॥ परि द्यावापृथिवी सद्य इत्वा परि लोकान्परि
दिशः परि स्वः॥ ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्तदासी
त्॥१२॥ सदसस्पतिम्॥ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्।
सनिं मेधामयासिषं स्वाहा॥१३॥ यां मेधाम्॥ यां मेधां देवगणाः पि
तरश्चोपासते॥ तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा॥१४॥ मे
धां मे॥ मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः॥ मेधामिन्द्रश्च वा

रुग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः॥ यो अन्तरिक्षे रजसो विमानः
कस्मै देवाय हविषा विधेम॥६॥ यं क्रन्दसी॥ यं क्रन्दसी अवसा तस्तभाने
अभ्यैक्षेतां मनसा रेजमाने॥ यत्राधि सूर उदितो विभाति कस्मै देवा
य हविषा विधेम॥ आपो ह यद्बृहतीर्यश्चिदापः॥७॥ वेनस्तत्॥ वेनस्तत्प
श्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम्॥ तस्मिन्निदं सं च
वि चैति सर्वं स ओतः प्रोतश्च विभूः प्रजासु॥८॥ प्रतत्॥ प्रतद्वोचेदम
तं नु विद्वान् गन्धर्वो धाम विभृतं गुहा सत्॥ त्रीणि पदानि निहितास्य गुहास्य य
स्तानि वेद स पितुः पितासत्॥९॥ स नः॥ स नो बन्धुर्जनिता स विधाता धा

त

तदेव शुक्रन्तद्ब्रह्म ता ऽआपः स प्रजापतिः॥१॥ सर्वे निमेषाः। सर्वे निमेषा जे
ज्ञिरे विद्युतः पुरुषादधि॥ नैनमूर्ध्वन्न तिर्यञ्चन्न मध्ये परिजग्रभत्॥२॥
न तस्य। प्रतिमा ऽअस्ति यस्य नाम महद्यशः॥ हिरण्यगर्भ ऽइत्येष मा मा
हिꣳसीदित्येषा यस्मान्न जात ऽइत्येषः॥३॥ एषो ह॥ एषो ह देवः प्रदि
शोऽनु सर्वाः पूर्वो ह जातः स ऽउ गर्भे ऽअन्तः॥ स एव जातः स जनिष्यमाणः
प्रत्यङ् जनास्तिष्ठति सर्वतोमुखः॥४॥ यस्माज्जातम्। यस्माज्जातन्न पु
रा किञ्चनैव य ऽआबभूव भुवनानि विश्वा॥ प्रजापतिः प्रजया सꣳररा
णस्त्रीणि ज्योतीꣳषि सचते स षोडशी॥५॥ येन द्यौः॥ येन द्यौरुग्रा पृ

प्रजापतिश्चरति॥ प्रजापतिश्चरति गर्ब्भे ऽअन्तरजायमानो बहुधा विजायते॥ तस्य योनिम्परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा॥१९॥ यो देवेभ्यः॥ यो देवेभ्य ऽआतपति यो देवानाम्पुरोहितः॥ पूर्व्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये॥२०॥ रुचम्ब्राह्मम्॥ रुचम्ब्राह्मञ्जनयन्तो देवा ऽअग्ग्रे तदब्रुवन्॥ यस्त्वैवम्ब्राह्मणो विद्यात्तस्य देवा ऽअसन्वशे॥२१॥ श्रीश्च॥ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्॥ इष्णन्निषाणामुम्म ऽइषाण सर्व्वल्लोकम्म ऽइषाण॥२२॥ इति संहितापाठे एकत्रि७शत्तमोध्यायः॥ तदेवा। तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः॥

तो हेमन्ताय पित्वा ऋक्षु ष्कि शिशिराय ॥११॥ त्र्यवयो गायत्र्यै। त्र्यवयो गा-
यत्र्यै पञ्चावयस्त्रिष्टुभे दित्यवाहो जगत्यै त्रिवत्सा ऽअनुष्टुभे तुर्य-
वाह ऽउष्णिहे ॥१२॥ पष्ठवाहो विराजः पष्ठवाहो विराज ऽउक्षाणो बृह-
त्या ऽऋषभाः ककुभेऽनड्वाहः पङ्क्त्यै धेनवोऽतिच्छन्दसे ॥१३॥ कृ-
ष्णग्रीवा ऽआग्नेयाः। कृष्णग्रीवा ऽआग्नेया बभ्रवः सोम्या ऽउपध्व-
स्ताः सावित्रा वत्सतर्यः सारस्वत्यः श्यामाः पौष्णाः पृश्नयो मारुता
बहुरूपा वैश्वदेवा वशा द्यावापृथिवीयाः ॥१४॥ उक्ताः सञ्चराः। उक्ताः
सञ्चरा ऽएता ऽऐन्द्राग्नाः कृष्णा वारुणाः पृश्नयो मारुताः कायास्तू

परा॥१५॥ अग्नयेनीकवते। अग्नयेनीकवते प्रथमजानालभते मरुद्भ्यः सा
न्तपनेभ्यः सवात्यान्मरुद्भ्यो गृहमेधिभ्यो बष्किहान्मरुद्भ्यः क्रीडि
भ्यः संसृष्टान्मरुद्भ्यः स्वतवद्भ्योनुसृष्टान्॥१६॥ उक्ष्णाः संचराः।
उक्ष्णाः संचराऽएताऽऐन्द्राग्नाः प्राशृङ्गा माहेन्द्रा बहुरूपा वैश्वकर्मणाः॥
॥१७॥ धूम्राबभ्रुनीकाशाः। धूम्राबभ्रुनीकाशाः पितृणां सोमवतां॥
बभ्रवो धूम्रनीकाशाः पितृणांबर्हिषदां कृष्णाबभ्रुनीकाशाः पितृणा
मग्निष्वात्तानां कृष्णाः पृषन्तस्त्रैयम्बकाः॥१८॥ उक्ष्णाः संचराः। उक्ष्णाः
संचराऽएताः शुनासीरीयाः श्वेता वायव्याः श्वेताः सौर्याः॥१९॥ व

सम्रैरत्नि॥३८॥बण्महाँ२॥बण्महाँ२॥असि सूर्य्यबडादित्यमहाँ२॥असि॥म
हस्ते सतो महिमापनस्यतेद्धा देवमहाँ२॥असि॥३९॥बट्सूर्य्य॥बट्सूर्य्यश्रवसा
महाँ२॥असि सत्रा देवमहाँ२॥असि॥मह्ना देवानामसुर्य्यःपुरोहितो विभुज्ज्यो
तिरदाब्भ्यम्॥४०॥श्रायन्तऽइव सूर्य्यम्॥श्रायन्तऽइवसूर्य्यं विश्वेदिन्द्रस्य
भक्षत॥वसूनि जाते जनमानऽओजसा प्रतिभागन्न दीधिम॥४१॥अद्या दे
वाः॥अद्या देवाऽउदिता सूर्य्यस्य निरंहसः पिपृतानिरवद्यात्॥तन्नो मित्रो
वरुणो मामहन्तामदितिः सिन्धुः पृथिवीऽउत द्यौः॥४२॥आकृष्णेन॥आकृ
ष्णेन रजसा वर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च॥हिरण्ययेन सविता रथेना

सम्रेरत्नि॥३९॥ बण्महाँ२॥ बण्महाँ२॥ असि सूर्य बडादित्य महाँ२॥ असि॥ म
हस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ२॥ असि॥ २॥ बट् सूर्य॥ बट् सूर्य श्रवसा
महाँ२॥ असि सत्रा देव महाँ२॥ असि॥ मह्ना देवानामसुर्यः पुरोहितो विभु ज्यो
तिरदाभ्यम्॥ ४०॥ आयन्त इव सूर्य॥ आयन्त इव सूर्यं विश्वेदिन्द्रस्य
भक्षत॥ वसूनि जाते जनमान ओजसा प्रति भागन्न दीधिम॥ ४१॥ अद्या दे
वाः॥ अद्या देवा उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात्॥ तन्नो मित्रो
वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥ ४२॥ आ कृष्णेन॥ आ कृ
ष्णेन रजसा वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च॥ हिरण्ययेन सविता रथेना

द्रुवो भ्रातृभुवे नानिपश्यन् ॥४५॥ प्रवीरजे । प्रवीरजेसु युधा बृहद्दिवो मा
विन्पती वद्या रिटऽइयाते ॥ चिरा सक्तो रुषसं सुवंहृ तौ वायु सः सुवा स्वस्तये
नियुत्वां सं नो इन्द्रवायू बृहस्पतिम् ॥ इन्द्रवायू बृहस्पतिं मित्राग्निं पूषण
भगम् ॥ आदित्यान्मारुतं गणम् ॥४५॥ वरुणः प्राविता ॥ वरुणः प्राविता भु
वन्मित्रो विश्वाभिरूतिभिः ॥ करतां नः सुराधसः ॥४६॥ अधि नः ॥ अधि न
इन्द्रैषां विष्णो सजात्यानाम् ॥ इता मरुतोऽअश्विना ॥ तं प्रत्नथायं वेनो वेदे
वासऽ आ नऽइन्द्रो भिर्विश्वेभिः सोमपमद्वो मा [illegible] गीध्यतः ॥४७॥ आ गन
इन्द्र ॥ आ नऽइन्द्र वरुण मित्र देवाः शर्द्धः प्रयन्त मारुतोत विष्णो ॥ उभा नासत्या रु
॥

ह्वोऽअध्वनाः पूषा रुद्रः सरस्वती जुषन्त ॥४८॥ इन्द्राग्नी ॥ इन्द्राग्नी मित्रावरु
णादितिꣳ स्वः पृथिवीन्द्याम्मरुतः पर्व्वताँ२॥ अपः ॥ हुवे विष्णुम्पूषणम्ब्रह्म
णस्पतिम्भगन्नु शꣳसꣳ सवितारमूतये ॥४९॥ अस्मे रुद्राः ॥ अस्मे रुद्रा
मेहना पर्व्वतासो वृत्रहत्ये भरहूतौ सजोषाः । यः शꣳसते स्तुवते धायि पज्रऽ
इन्द्रज्येष्ठाऽअस्माँ२ऽअवन्तु देवाः ॥५०॥ अर्वाञ्चोऽअद्य ॥ अर्वाञ्चोऽअद्या
भवता यजत्राऽआ वो हार्दि भयमानो व्ययेयम् । त्राध्वन्नो देवा निजुरो वृकस्य
त्राध्वङ्कर्त्तादवपदो यजत्राः ॥५१॥ विश्वेऽअद्य ॥ विश्वेऽअद्य मरुतो विश्वऽ
ऊती विश्वे भवन्त्वग्नयः समिद्धाः । विश्वे नो देवाऽअवसागमन्तु विश्वमस्तु

द्रविणं धाजो ऽ अस्मे ॥५२॥ विश्वे देवाः ॥ विश्वे देवाः शृणुतेम७ं हवं मे ये ऽ
घ२ अन्तरिक्षे य ऽ उप द्यवि ष्ठ ॥ ये ऽ अग्निजिह्वा ऽ उत वा यजत्रा ऽ आसद्यास्मि
न्बर्हिषि मादयध्वम् ॥५३॥ देवेभ्यो हि ॥ देवेभ्यो हि प्रथमं यज्ञियेभ्यो ऽमृ
तत्व७ं सुवसि भागमुत्तमम् ॥ आदिद्दामानं७ सवितर्व्यूर्णुषे ऽनूचीना जीवि
ष ता मानुषेभ्यः ॥५४॥ प्र वायुम् ॥ प्र वायुमच्छा बृहती मनीषा बृहद्रयिं विश्वव
वार७ं रथप्राम् ॥ द्युतद्यामा नियुतः पत्यमानः कविः कविमियक्षसि प्र
यज्यो ॥५५॥ इन्द्रवायू ऽ इमे ॥ इन्द्रवायू ऽ इमे सुता ऽ उप प्रयोभिरागतम् ॥
इन्दवो वामुशन्ति हि ॥५६॥ मित्र७ं हुवे ॥ मित्र७ं हुवे पूतदक्षं वरुणं च रिशा

द सम्र ॥ धियेद्धं ताव्री ए३ साधेन्ना ॥ ५७ ॥ दस्रो सुवाकेवः । दस्रो सुवाकेवः सुताना
सत्याहृक्रु वहिष ॥ आयातं ए३ रुद्रवर्त्तनी ॥ तस्मान्नशायं चुनेः ॥ ५८ ॥ छिदद्यदे ॥
छिदद्यदी सुरमारुग्णाम हुम्मे हिपार्थः ए३ र्च्यो३ सद्योकः ॥ अग्नेन्नयत्सुप
घक्षेराण्णामद्धार वेम्यथमाजानती गोत्रः ॥ ५९ ॥ नहिस्पशो म ॥ नहिस्पशाम विद
नन्यमस्मा द्वैश्वानरात्सुरः एतारमग्नेः ॥ एमेनमवृधन्नमृता ऽ अमर्त्यं वैश्वान
रदूः त्रजित्याय देवाः ॥ ६० ॥ उग्याद्वि घनिनो ॥ उग्याद्वि घनि नामधेऽ इन्द्राग्नी हेवा
महे ॥ तानो मृडात ऽ ईद्दशो ॥ ६१ ॥ उपो स्म्मे ॥ उपो स्मै गायता नरः पवमानायेन्द
वे ॥ अभि देवाँ ॥ इयक्षते ॥ ६२ ॥ ये त्वा ॥ ये त्वाहिहत्ये मघवन्न वर्द्धन्ये शाम्बरे ह

रिवो अगविष्टौ॥ अत्रा नूनमनुमदन्ति विप्राः॥ पिबेन्द्र सोमँ सगणो मरुद्भिः॥६३॥
जनिष्ठा ऽउग्रः॥ जनिष्ठा ऽउग्रः सहसे तुराय मन्द्र ऽओजिष्ठो बहुलाभिमानः॥
अवर्द्धन्निन्द्रम्मरुतश्चिदत्र माता यद्वीरन्दधनद्धनिष्ठा॥६४॥ आ तु॥ आ तू न ऽ
इन्द्र वृत्रहन्नस्माकमर्द्धमागहि॥ महान्महीभिरूतिभिः॥६५॥ त्वमिन्द्र॥ त्वमि
न्द्र प्रतूर्तिष्वभि विश्वा ऽअसि स्पृधः॥ अशस्तिहा जनिता वृत्रतूरसि त्वन्तू
र्य्य तरुष्यतः॥६६॥ अनु ते॥ अनु ते शुष्मन्तुरयन्तमीयतुः॥ क्षोणी शिशुन्नमा
तरा॥ विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि॥६७॥ यज्ञो दे
वानाम्॥ यज्ञो देवानाम्प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः॥ आ वोऽर्वाची

सुमतिर्व्वैरस्याँदृ७ंहोष्विघावेरिवोवित्तरासेत॥६८॥ अदब्धेभिःसवितः॥ अदब्धेभिः
सवितःपायुभिष्ट्व७ंशिवेभिरद्यपरिपाहिनोगयम्॥ हिरण्यजिह्वःसुवितायन
व्यसेरक्षामाकिर्नोऽअघश७ंसऽईशत॥६९॥ प्रवीरया॥ प्रवीरयाशुचे
योददिरेवामध्वर्युभिर्म्मधुमन्तःसुतासः॥ वहवायोनियुतोअच्छापि
बासुतस्यान्धसोमदाय॥७०॥ गावऽउप॥ गावऽउपावतावतंमहीय
रं ज्ञस्यरप्सुदा॥ उभाकर्णाहिरण्यया॥७१॥ काव्ययोराजानेषु॥ काव्ययो
राजानेषुक्रत्वादक्षस्यदुरोणे॥ रिशादसासधस्थऽआ॥७२॥ दैव्याव
ध्वर्यू॥ दैव्यावध्वर्यूऽआगत७ंरथेनसूर्यत्वचा॥ मध्वायज्ञ७ंसमञ्जाथे॥

त्मुत्तनथायंचेूनः॥७३॥तिरश्चीनोविनतः॥तिरश्चीनोविततोरश्मिरेषामधः
स्विदासी३दुपरिस्विदासी३त॥रेतोधाऽआसन्महिमानऽआसन्त्स्वधाऽअवस्तात्
प्रयतिःपरस्तात्॥७४॥आरोदसी॥आदसीऽअपृणदास्वर्महिज्जातंयदे
नमपसोऽअधारयन्॥सोऽअध्वरायपरिणीयतेकविरत्योनवाजसातये
चनोहितः॥७५॥उक्थेभिर्वृत्रहन्तमा॥उक्थेभिर्वृत्रहन्तमायामन्दानाचि
दागिरा॥आङ्गूषैराविवासतः॥७६॥उपनः॥उपनःसूनवोगिरःशृण्वन्त्व
मृतस्यये॥सुमृडीकाभवन्तुनः॥७७॥ब्रह्माणिमे॥ब्रह्माणिमेमतयः
शंसुतासःशुष्मऽइयर्तिप्रभृतोमेऽअद्रिः॥आशासतेप्रतिहर्यन्त्युक्थेमा

हरीव्वहतस्तान्नोऽअच्छ॥७८॥अनुत्तमाते॥अनुत्तमातेमघवन्नकिर्न्नुनत्वावाँ॥
अस्तिदेवताविदानः॥नजायमानोनशतेनजातोयानिकरिष्याकृणुहिप्रवृ
द्ध॥७९॥तदित्॥तदिदासभुवनेषुज्ज्येष्ठंयतोजज्ञऽउग्ग्रस्त्वेषनृम्णः॥स
द्योजज्ञानोनिरिणातिशत्रूननुयंविश्श्वेमदन्त्यूमाः॥८०॥इमाऽउत्त्वा॥इ
माऽउत्त्वापुरूवसोगिरोवर्द्धन्तुयाममा॥पावकवर्णाःशुचयोविपश्चितोभि
स्तोमैरनूषत॥८१॥यस्यायम्॥यस्यायंविश्श्वऽआर्य्योदासःशेवधिपा
अरिः॥तिरश्चिदर्य्येरुशमेपवीरवितुभ्येत्सोऽअज्ज्यतेरयिः॥८२॥अयꣳ
सहस्रमृषिभिःसहस्कृतःसमुद्रऽइवपप्रथे॥सत्यःसोऽअस्यमहिमा
गृणेशवोयज्ञेषुविप्रराज्ये॥८३॥अदब्धेभिःसवितः॥अदब्धेभिःस

वितः पायुभिष्ट्वं शिवेभिरद्य परिपाहि नो गयम्॥ हिरण्यजिह्वः सुविताय
नव्यसे रक्षा माकिर्नो ऽअघशंस ईशत॥८४॥ आ नो यज्ञं दिविस्पृशं वा
यो याहि सुमन्मभिः॥ अन्तः पवित्र ऽउपरि श्रीणानोयं शुक्रो ऽअया
मि ते॥८५॥ इन्द्रवायू सुसन्दृशा॥ इन्द्रवायू सुसन्दृशा सुहवेह हवामहे॥ य
था नः सर्व ऽइज्जनो ऽनमीवः सङ्गमे सुमना ऽअसत्॥८६॥ ऋधगित्था॥ ऋधगि
त्था स मर्त्यः शशमे देवतातये॥ यो नूनं मित्रावरुणावभिष्टय ऽआचक्रे
हव्यदातये॥८७॥ आयातम्॥ आयातमुप भूषतं मध्वः पिबतमश्विना॥
दुग्धम्पयो वृषणा जेन्यावसू मा नो मर्द्धिष्टमागतम्॥८७॥ प्रैतु॥ प्रैतु ब्र
ह्मणस्पतिः प्र देव्येतु सूनृता॥ अच्छा वीरन्नर्य्यम्पङ्क्तिराधसन्देवा य

सोन्नेयन्तुः॥८॥ चन्द्रमाऽअप्स्व॥ चन्द्रमाऽअप्स्वन्तरा सुपर्णो धावते दिवि॥ रयिम्पि
शाङ्गः म्बहुलम्पुरुस्पृह७ हरिरेति कनिक्रदत्॥९॥ देवन्देवंवः॥ देवन्देवंवोव
सेदेवन्देवमभिष्टये॥ देवन्देव७ हुवेम वाजसातये गृणन्तो देव्या धिया॥१०॥ दिवि
पृष्ठः॥ दिविपृष्ठोऽअरोचताग्निर्वैश्वानरो बृहन्॥ क्षमया वृधानऽओजसा
चनोहितो ज्योतिषा बाधते तमः॥११॥ इन्द्राग्नीऽअपात्॥ इन्द्राग्नीऽअपा
दियम्पूर्वागात्पद्वतीभ्यः॥ हित्वी शिरो जिह्वया वावदच्चरत्त्रि७ शत्पदा न्यक्र
मीत्॥१२॥ देवासोहि॥ देवासो हिष्मा मनवे समन्यवो विश्वे साक७ सरातयः॥
ते नोऽअद्य तेऽअपरन्तुचे नो भवन्तु वरिवोविदः॥१४॥ अपाघमप॥ अपाघ
तु

मदभिशस्तीरस्यास्तिहांथेन्द्रोधुम्न्यात्रेवतः॥ देवास्त ऽइन्द्र सख्याय येमिरे बृहद्भा
नो मरुद्गण॥९५॥ प्रवः॥ प्रव ऽइन्द्राय बृहते मरुतो ब्रह्मार्चत॥ वृत्रं हनति वृ
त्रहा शतक्रतुर्वज्रेण शतपर्वणा॥९६॥ अस्येत्॥ अस्येदिन्द्रो वावृधे वृष्ण्यं
शवो मदे सुतस्य विष्णवि॥ अद्यातमस्य महिमानमायवोऽनुष्टुवन्ति पूर्वथा॥
इमा ऽउत्वा यस्यायमयं सहस्रमूर्द्ध्व ऽऊ षु णः॥९७॥ इति संहितापाठे त्रय
स्त्रिंशत्तमोऽध्यायः॥ यज्जाग्रतः॥ यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य
तथैवैति॥ दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु॥१॥ येन
कर्म्माणि॥ येन कर्म्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः॥ यदपूर्वं

यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥२॥ यत्प्रज्ञानम् ॥ यत्प्रज्ञा
नमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ॥ यस्मान्न ऋते किञ्चन कर्म
क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ॥३॥ येनेदम् ॥ येनेदं भूतं भुवनं भवि
ष्यत्परिगृहीतममृतेन सर्वम् ॥ येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवस
ङ्कल्पमस्तु ॥४॥ यस्मिन्नृचः ॥ यस्मिन्नृचः साम यजूंषि यस्मिन्प्रति
ष्ठिता रथनाभाविवाराः ॥ यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शि
वसङ्कल्पमस्तु ॥५॥ सुषारथिरश्वानिव ॥ सुषारथिरश्वानिव यन्मनु
ष्यान्नेनीयतेऽभीशुभिर्वाजिन इव ॥ हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शि

वसेदुःस्वप्न्यमस्तु॥६॥ पितुन्नु॥ पितुन्नु स्तोषम्महो धर्म्माणन्तविषीम्॥ अस्य त्रितो
व्योजसा वृत्रं विपर्वमर्दयत्॥७॥ अन्विद्॥ अन्विदनुमते त्वम्मन्यासै शञ्च न
स्कृधि॥ क्रत्वे दक्षाय नो हिनु प्रण ऽआयूंषि तारिषः॥८॥ अनुनः॥१८००॥ अनु
नोद्यानुमतिर्य्यज्ञन्देवेषु मन्यताम्॥ अग्निश्च हव्यवाहनो भवतन्दाशुषे मयः॥९॥
सिनीवालि पृथुष्टुके॥ सिनीवालि पृथुष्टुके या देवानामसि स्वसा॥ जुषस्व हव्य
माहुतम्प्रजान्देवि दिदिड्ढि नः॥१०॥ पञ्चनद्यः॥ पञ्च नद्यः सरस्वतीमपियन्ति
सस्रोतसः॥ सरस्वती तु पञ्चधा सो देशेऽभवत्सरित्॥११॥ त्वमग्ने॥ त्वमग्ने प्रथ
मोऽअङ्गिराऽऋषिर्देवो देवानामभवः शिवः सखा॥ तव व्रते कवयो विद्मनापसो

जो यत्तमरुतो भ्राजदृष्टयः ॥१२॥ त्वन्नः ॥ त्वन्नोऽअग्ने तव देव पायुभिर्म्मघोनो रक्ष
तन्वश्च वन्द्य ॥ त्राता तोकस्य तनये गवामस्यनिमेषं रक्षमाणस्तव व्रते ॥१३॥
उत्तानायामव ॥ उत्तानायामवभरा चिकित्वान्त्सद्यः प्रवीता वृषणञ्जजान ॥ अ
रुषस्तूपो रुशदस्य पाजऽइडायास्पुत्रो वयुनेऽजनिष्ट ॥१४॥ इडायास्त्वा ॥
इडायास्त्वा पदे वयन्नाभा पृथिव्याऽअधि ॥ जातवेदो नि धीमह्यग्ने हव्याय वो
ढवे ॥१५॥ प्रमन्महे ॥ प्रमन्महे शवसानाय शूषमाङ्गूषङ्गिर्वणसेऽअङ्गिरस्व
त् ॥ सुवृक्तिभिः स्तुवतऽऋग्मियायार्चामार्कन्नरे विश्रुताय ॥१६॥ प्रवः ॥ प्र
वो महे महि नमो भरध्वमाङ्गूष्यं शवसानाय साम ॥ येना नः पूर्वे पितरः पदृ

१० २५

ज्ञाऽअर्चन्तोऽअङ्गिरसोगाऽअविन्दन्॥१७॥इछन्तिवा॥इछन्तित्वासोम्यासः
सखायः।सुन्वन्तिसोमन्दधतिप्रयाꣳसि॥तितिक्षन्तेऽअभिशस्तिञ्ज
नानामिन्द्रत्वदाकश्चनहिप्रकेतः॥१८॥नते॥नतेदूरेपरमाचिद्रजाꣳस्यातु
प्रयाहिहरिवोहरिभ्याम्॥स्थिरायवृष्णेसवनाकृतेमायुक्ताग्रावाणःसमि
धानेऽअग्नौ॥१९॥अषाढꣳयुत्सु॥अषाढंयुत्सुपृतनासुपप्रिꣳस्वर्षाम
प्सांवृजनस्यगोपाम्॥भरेषुजाꣳसुक्षितिꣳसुश्रवसञ्जयन्तन्त्वामनु
मदेमसोम॥२०॥सोमोधेनुम्॥सोमोधेनुꣳसोमोऽअर्वन्तमाशुꣳसोमो
वीरङ्कर्मण्यन्ददाति॥सादन्यंविदथ्यꣳसभेयम्पितृश्रवणंयोददाशद

द्वस्मे॥२१॥ त्वमिमाः॥ त्वमिमाऽओषधीः सोम विश्वास्त्वमपोऽअजन
यस्त्वङ्गाः॥ त्वमाततन्थोर्वन्तरिक्षन्त्वञ्ज्योतिषा वि तमो ववर्थ॥२२॥
देवेन नः॥ देवेन नो मनसा देव सोम रायो भागᳬं सहसावन्नभि युध्य॥
मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ॥२३॥ अष्
टौ वि॥ अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून्॥
र हिरण्याक्षः सविता देवऽआगाद्दधद्रत्ना दाशुषे वार्याणि॥२४॥ हिरण्यपा
णिः सविता॥ हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवीऽअन्तरी
यते॥ अपामीवाम्बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति॥२५॥

हिरण्यहस्तो ऽ असुरः ॥ हिरण्यहस्तो ऽ असुरः सुनीथः सुमृडीकः स्ववा यात्वर्वा
ङ् ॥ अपसेधन्रक्षसो यातुधानानस्थाद्देवः प्रतिदोषं गृणानः ॥२६॥ ये ते प
न्थाः सवितः पूर्व्यासोऽरेणवः सुकृता ऽ अन्तरिक्षे ॥ तेभिर्नो ऽ अद्य पथिभिः
सुगेभी रक्षा च नो ऽ अधि च ब्रूहि देव ॥२७॥ उभा पिबतम् ॥ उभा पिबतमश्वि
नोभा नः शर्म यच्छतम् ॥ अविद्रियाभिरूतिभिः ॥२८॥ अप्नस्वतीमश्विना ॥
अप्नस्वतीमश्विना वाचमस्मे कृतं नो दस्रा वृषणा मनीषाम् ॥ अद्यूत्ये
ऽवसे नि ह्वये वां वृधे च नो भवतं वाजसातौ ॥२९॥ द्युभिरक्तुभिः ॥ द्युभिरक्तु
भिः परि पातमस्मानरिष्टेभिरश्विना सौभगेभिः ॥ तन्नो मित्रो वरुणो मा
महन्तामदितिः सिन्धुः पृथिवी ऽ उत द्यौः ॥३०॥ आ कृष्णेन ॥ आ कृष्णेन रज

सा वर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च॥ हिरण्ययेन सविता रथेना देवो याति
भुवनानि पश्यन्॥ ३१॥ आरात्रि। आरात्रि पार्थिवꣳ रजः पितुरप्रायि धाम
भिः॥ दिवः सदाꣳसि बृहती वितिष्ठस आत्वेषं वर्त्तते तमः॥ ३२॥ उषस्त
त्॥ उषस्तच्चित्रमाभरास्मभ्यं वाजिनीवति॥ येन तोकञ्च तनयञ्च धामहे॥
॥ ३३॥ प्रातरग्निम्॥ प्रातरग्निम्प्रातरिन्द्रꣳ हवामहे प्रातर्म्मित्रावरुणा प्रात
रश्विना॥ प्रातर्ब्भगम्पूषणम्ब्रह्मणस्पतिम्प्रातः सोममुत रुद्रꣳ हुवेम॥ ३४॥
प्रातर्ज्जितम्भगम्॥ प्रातर्ज्जितम्भगमुग्रꣳ हुवेम वयम्पुत्रमदितेर्य्यो विधर्त्ता॥
आध्रश्चिद्यम्मन्यमानस्तुरश्चिद्राजा चिद्यम्भगम्भक्षीत्याह॥ ३५॥ भग प्रणे
तः॥ भग प्रणेतर्ब्भग सत्यराधो भगेमान्धियमुदवा ददन्नः॥ भग प्रणो जनय गो

भि रश्वैर्भग प्र नृभिर्नृवन्तः स्याम।।३६।। उतेदानीम्।। उतेदानीम्भगवन्तः
स्यामोत प्रपित्वऽउत मध्येऽअह्नाम्।। उतोदिता मघवन्त्सूर्यस्य वयन्देवानां
सुमतौ स्याम।।३७।। भगऽएव।। भगऽएव भगवाँ२।। अस्तु देवास्तेन वयम्भग
वन्तः स्याम।। तन्त्वा भग सर्वऽइज्जोहवीति स नो भग पुरऽएता भवेह।।३८।।
समध्वराय।। समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय।। अर्वाचीनं वसु
विदम्भगन्नो रथमिवाश्वा वाजिनऽआवहन्तु।।३९।। अश्वावतीर्गोमतीः।।
अश्वावतीर्गोमतीर्न्नऽउषासो वीरवतीः सदमुच्छन्तु भद्राः।। घृतन्दुहा
ना विश्वतः प्रपीता यूयम्पात स्वस्तिभिः सदा नः।।४०।। पूषन्तव।। पूष
न्तव व्रते वयन्न रिष्येम कदा चन।। स्तोतारस्तऽइह स्मसि।।४१।। पथ

स्पृथः परि पतिम् ॥ पृथस्पृथः परि पतिं वचस्या कामेन कृतो ऽअभ्यानडर्कम् ॥
सनोरास छुरुधश्चन्द्रा ग्रांधियन्धिय७ सीषधाति प्रपूषा ॥४२॥ त्रीणिपदा ॥
त्रीणिपदा विचक्रमे विष्णुर्गोपा ऽअदाभ्यः ॥ अतोधर्म्माणि धारयन् ॥४३॥

नु

तद्विप्रासः ॥ तद्विप्रासो विपन्यवो जागृवाᳪं सः समिन्धते ॥ विष्णोर्यत्पर
मम्पदम् ॥४४॥ घृतवती भुवनानाम् ॥ घृतवती भुवनानामभिश्रियोर्वी
पृथ्वी मधुदुघे सुपेशसा ॥ द्यावापृथिवी वरुणस्य धर्म्मणा विष्कभिते ऽअ
जरे भूरिरेतसा ॥४५॥ येनः ॥ येनः सपत्ना ऽअप ते भवन्त्विन्द्राग्निभ्यामव
बाधामहे तान् ॥ वसवो रुद्रा ऽआदित्या ऽउप [illegible] न्ते तीरमधिरा

जमेकं च॥४६॥ आ नो सत्या॥ आ नो सत्या त्रिभि [illegible] भिर्वीतं मधु
पेयमश्विना॥ आयुस्तारिष्टं नीरपांसि मृक्षतं सेधतं द्वेषो भवतं
सचाभुवा॥४७॥ एष वः॥ एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य का
रोः॥ एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम्॥४८॥ सहस्तोमाः
सहछन्दसः॥ सहस्तोमाः सहछन्दस आवृतः सहप्रमा ऋषयः सप्त
दैव्याः॥ पूर्वेषां पन्थामनुदृश्य धीरा अन्वालेभिरे रथ्यो न रश्मीन्॥४९॥
आयुष्यं वर्चस्यम्॥ आयुष्यं वर्चस्यं रायस्पोषमौद्भिदम्॥ इदं हिर
ण्यं वर्चस्वज्जैत्रायाविशतादु माम्॥५०॥ न तद्॥ न तद्रक्षांसि न पिशाचा

स्तोरन्तिदेवानामोजः प्रथमजꣳ ह्येतत्॥ यो बिभर्त्ति दाक्षायणꣳ हिरण्यꣳ
स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः॥५१॥ यदा
बध्नन्॥ यदाबध्नन्दाक्षायणा हिरण्यꣳ शतानीकाय सुमनस्यमानाः॥
तन्मऽआबध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम्॥५२॥ उत
नः॥ उत नोऽहिर्बुध्न्यः शृणोत्वजऽएकपात्पृथिवी समुद्रः॥ विश्वेदेवाऽ
ऋतावृधो हुवानाः स्तुता मंत्राः कविशस्ताऽअवन्तु॥५३॥ इमा गिरः॥ इमा गि
रऽआदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि॥ शृणोतु मित्रोऽ
र्यमा भगो नस्तुविजातो वरुणो दक्षोऽ [illegible]॥५४॥ सप्तऽऋष

षयः॥ सुप्तऽऋषयः प्रतिहिताः शरीरे सुप्त रक्षन्ति सदमप्रमादम्॥ सुप्तापः

स्वपतो लोकमीयुस्तत्र जागृतोऽअस्वप्नजौ सत्रसदौ च देवौ॥५५॥ उत्ति

ष्ठ॥ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे॥ उप प्रयन्तु मरुतः सुदान

वऽइन्द्र प्राशूर्भवा सचा॥५६॥ प्र नूनम्॥ प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वद

त्युक्थ्यम्॥ यस्मिन्निन्द्रो वरुणो मित्रोऽअर्यमा देवाऽओकांसि चक्रि

रे॥५७॥ ब्रह्मणस्पते॥ ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि

तनयं च जिन्व॥ विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः॥ यऽ

इमा विश्वा॥ विश्वकर्मा यो नः पितान्नपतेन्नस्य नो देहि॥५८॥ इति संहि

वा पुः पुनातु ॥ सविता पुनात्वग्नेर्भ्राजसा सूर्य्यस्य वर्च्चसा ॥ विमुच्यन्तामुस्रियाः ॥३॥
तापाठे चतुस्त्रिं७शत्तमोध्यायः ॥ अपेतः ॥ अपेतो यन्तु पणयोसुम्नादेवपी
यवः ॥ अस्य लोकः सुतावतः ॥ द्युभिरहोभिरक्तुभिर्व्यक्तं यमोददात्ववसा
नमस्मै ॥१॥ सविता ते ॥ सविता ते शरीरेभ्यः पृथिव्यांल्लोकमिच्छतु ॥ त
स्मै युज्यन्तामुस्रियाः ॥२॥ अश्वत्थे वः ॥ अश्वत्थे वो निषदनं पर्णे
वो वसतिष्कृता ॥ गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥४॥ सविता
ते ॥ सविता ते शरीराणि मातुरुपस्थ आवपतु ॥ तस्मै पृथिवि शम्भव ॥५॥
प्रजापतौ त्वा ॥ प्रजापतौ त्वा देवतायामुपोदके लोके निदधाम्यसौ ॥ अप नः शो
शुचदघम् ॥६॥ परं मृत्यो ॥ परं मृत्यो अनु परेहि पन्थां यस्ते अन्य
इतरो देवयानात् ॥ चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मो

199

२४६

200

तद्वीमहे॥७॥शंवातः॥शंवातः शꣳहि ते घृणिः शन्ते भवन्त्विष्टकाः॥शन्ते भवन्त्वग्नयः पार्थिवासो मा त्वाभिशूशुचन्॥८॥कल्पन्तान्ते॥कल्पन्तान्ते दिशस्तुभ्यमापः शिवतमास्तुभ्यम्भवन्तु सिन्धवः॥अन्तरिक्षꣳ शिवन्तुभ्यङ्कल्पन्तान्ते दिशः सर्वाः॥९॥अश्मन्वतीरीयते॥अश्मन्वतीरीयते सꣳरभध्वमुत्तिष्ठत प्रतरता सखायः॥अत्रा जहीमो शिवा ये असञ्छिवान्वयमुत्तरेमाभि वाजान्॥१०॥

पु

अपाघम्॥अपाघमपकिल्बिषमपकृत्यामपोरपः॥अपामार्ग त्वमस्मदप दुःष्वप्न्यꣳ सुव॥११॥सुमित्रिया नः॥सुमित्रिया नऽआपऽओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च वयन्द्विष्मः॥१२॥अनड्वाहमन्वारभामहे॥अनड्वाहमन्वारभामहे सौरभेयꣳ स्वस्तये॥स नऽइन्द्रऽइव देवेभ्यो व

ङ्क्तिः सन्तारेणोभव॥१३॥ उद्वयम्॥ उद्वयन्तमसस्परि स्वः पश्यन्तऽउत्तरम्॥
देवन्देवत्रा सूर्यमगन्मज्ज्योतिरुत्तमम्॥१४॥ इमञ्जीवेभ्यः॥ इमञ्जीवे
भ्यः परिधिन्दधामि मैषान्नुगादपरोऽअर्थमेतम्॥ शतञ्जीवन्तु शरदः पुरू
चीरन्तम्मृत्युन्दधताम्पर्वतेन॥१५॥ अग्नऽआयूंषि॥ अग्नऽआयूंषि पवसऽआ
सुवोर्ज्जमिषञ्चनः॥ आरे बाधस्व दुच्छुनाम्॥१६॥ आयुष्मानग्ने॥ आयुष्मान
ग्ने हविषा वृधानो घृतप्रतीको घृतयोनिरेधि॥ घृतम्पीत्वा मधु चारु गव्यम्पिते
व पुत्रमभिरक्षतादिमान्स्वाहा॥१७॥ परीमे॥ परीमेगामनेषत पर्यग्निमहृष
त॥ देवेष्वक्रत श्रवः कऽइमाँ॥ आदधर्षति॥१८॥ क्रव्यादमग्निम्॥ क्रव्या
दमग्निम्प्रहिणोमि दूरं यमराज्यङ्गच्छतु रिप्रवाहः॥ इहैवायमितरो जातवे

202 २४७

हा देवेभ्यो हव्यं वहतु प्रजानन्॥१९॥ वह वपाम्॥ वह वपां जातवेदः पितृभ्यो य
त्रैनान्वेत्थ निहितान्पराके॥ मेदसः कुल्याऽउप तान्स्रवन्तु सत्याऽएषामाशिषः स
न्नमन्तां स्वाहा॥२०॥ स्योना पृथिवि॥ स्योना पृथिवि नो भवानृक्षरा निवेशनी॥
यच्छा नः शर्म्म सप्रथाः॥ अप नः शोशुचदघम्॥२१॥ अस्मात्त्वम्॥ अस्मात्त्व
मधि जातोसि त्वदयं जायतां पुनः॥ असौ स्वर्गाय लोकाय स्वाहा॥२२॥ इति संहि
तापाठे पञ्चत्रिं७ शत्तमोध्यायः॥ ऋचं वाचम्॥ ऋचं वाचं प्रपद्ये मनो यजुः
प्रपद्ये साम प्राणं प्रपद्ये चक्षुः श्रोत्रं प्रपद्ये॥ वागोजः सहौजो मयि प्रा
णापानौ॥१॥ यन्मे॥ यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्प
तिर्मे तद्दधातु॥ शन्नो भवतु भुवनस्य यस्पतिः॥२॥ भूर्भुवः॥ भूर्भुवः स्वः

का

तत्सवितुर्वरेण्यम्भर्गोदेवस्यधीमहि॥धियोयोनःप्रचोदयात्॥३॥कयानः॥
कयानश्चित्रऽआभुवदूतीसदावृधःसखा॥कयाशचिष्ठयावृता॥४॥कस्त्वा॥
कस्त्वासत्योमदानाम्मꣳहिष्ठोमत्सदन्धसः॥दृढाचिदारुजेवसु॥५॥अभीषु
णः॥अभीषुणःसखीनामविताजरितॄणाम्॥शतम्भवास्यूतिभिः॥६॥कयात्व
न्न॥कयात्वन्नऽऊत्याभिप्रमन्दसेवृषन्॥कयास्तोतृभ्यऽआभर॥७॥इन्द्रोवि
श्वस्य॥राजति॥शन्नोऽअस्तुद्विपदेशञ्चतुष्पदे॥८॥शन्नोमित्रः॥शन्नोमि
त्रःशंवरुणः॥शन्नोभवत्वर्य्यमा॥शन्नऽइन्द्रोबृहस्पतिः॥शन्नोविष्णुरुरुक्र
मः॥९॥शन्नोवातः॥शन्नोवातःपवताꣳशन्नस्तपतुसूर्य्यः॥शन्नःकनिक्र

२०३

दद्भुवः पर्ज्जन्यो ऽभिवर्षतु ॥१०॥ अहानि शं ॥ अहानि शंभवन्तु नः शं रात्रीः प्रतिधीयताम् ॥ शन्न ऽइन्द्राग्नी भवतामवोभिः शन्न ऽइन्द्रावरुणा रातहव्या ॥ शन्न ऽइन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शंयोः ॥११॥ शन्नः । शन्नो देवीरभिष्टय ऽआपो भवन्तु पीतये ॥ शंय्योरभिस्रवन्तु नः ॥१२॥ स्योना पृथिवि ॥ स्योना पृथिवि नो भवानृक्षरा निवेशनी ॥ यच्छा नः शर्म सप्रथाः ॥१३॥ आपो हि ॥ आपो हि ष्ठा मयोभुवस्ता न ऽऊर्ज्जे दधातन ॥ महे रणाय चक्षसे ॥१४॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः ॥ उशतीरिव मातरः ॥१५॥ तस्मा ऽअरं ॥ तस्मा ऽअरङ्गमाम वो यस्य क्षयाय जिन्वथ ॥ आपो जनयथा च नः ॥१६॥

द्यौः शान्तिः। द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषध
यः शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वं शा
न्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥१७ दृते दृंह मा। दृते दृंह मा मि
स्य
त्रस्मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्॥ मित्रस्याहं चक्षुषा सर्वाणि
भूतानि समीक्षे॥ मित्रस्य चक्षुषा समीक्षामहे॥१८॥ दृते दृंह मा। दृते दृं
ह मा॥ ज्योक्ते संदृशि जीव्यासं ज्योक्ते संदृशि जीव्यासम्॥ नमस्ते। न
मस्ते हरसे शोचिषे नमस्तेऽअस्त्वर्चिषे। अन्यांस्तेऽअस्मत्तपन्तु हेतयः
पावकोऽअस्मभ्यं शिवो भव॥२०॥ नमस्ते। नमस्तेऽअस्तु विद्युते नमस्ते

स्तनयित्नवे॥ नमस्तेभगवन्नस्तुयतः स्वः समीहसे॥२१॥ यतोयतः समीहसे॥
यतोयतः समीहसेततोनोऽअभयङ्कुरु॥ शन्नः कुरुप्रजाभ्योऽभयन्नः प
शुभ्यः॥२२॥ सुमित्रियानः॥ सुमित्रियानऽआपऽओषधयः सन्तु दुर्म्मित्रिया
स्तस्मैसन्तुयोस्मान्द्वेष्टियञ्चवयन्द्विष्मः॥२३॥ तच्चक्षुः॥ तच्चक्षुर्देवहि
तम्पुरस्ताच्छुक्रमुच्चरत्॥ पश्येमशरदःशतञ्जीवेमशरदःशतꣳशृणु
यामशरदःशतम्प्रब्रवामशरदःशरदः शतमदीनाः स्यामशरदःशतम्भू
यश्चशरदःशतात्॥२४॥ इति संहितापाठे षट्त्रिꣳशत्तमोध्यायः॥ देवस्यत्वा॥
देवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम्॥ आददेनारिर

व्यायामसि ॥ पावकोऽअस्मभ्यꣳ शिवो भव ॥४॥ हिमस्य त्वा
जरायुणाग्ने परिव्ययामसि ॥ पावकोऽअस्मभ्यꣳ शिवो भव ॥
५॥ उपज्मन्नुप वेतसेऽवतर नदीष्वा ॥ ऽअग्ने पित्तमपामसि म
ण्डूकि ताभिरागहि सेमन्नो यज्ञम्पावकवर्णꣳ शिवङ्कृधि ॥
६॥ अपामिदन्न्ययनꣳ समुद्रस्य निवेशनम् ॥ अन्याँस्ते
ऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यꣳ शिवो भव ॥७॥ अग्ने
पावक रोचिषा मन्द्रया दे

अश्मन्नूर्जं पर्वते शिश्रियाणामद्भ्यऽओषधीभ्यो वनस्प
तिभ्यो अधि सम्भृतं पयः। तान्नऽइषमूर्जं धत्त मरुतः संर
राणाःऽअश्मँस्ते क्षुन्मयि तऽऊर्ग्यं द्विष्मस्तन्ते शुगृच्छतु ॥१॥
इमा मेऽअग्नऽइष्टका धेनवः सन्त्वेका च दश च दश च शतञ्च शत-
तञ्च सहस्रञ्च सहस्रञ्चायुतञ्चायुतञ्च नियुतञ्च प्रयुतञ्चार्बुद
ञ्च न्यर्बुदञ्च समुद्रश्च मध्यञ्चान्तश्च परार्धश्चैता मेऽअग्नऽ
इष्टका धेनवः सन्त्वमुत्रामुष्मिँल्लोके ॥२॥ ऋतव स्थऽऋतावृ
धऽऋतुष्ठा स्थऽऋतावृधः। घृतश्चुतो मधुश्चुतो विराजो नाम
कामदुघाऽअक्षीयमाणाः ॥३॥ समुद्रस्य त्वावकयाग्ने परि-

त्वा परिंगृह्णाम्यंतरिक्षेणोपयछामि॥ इन्द्राश्विना मधुनः सारघस्य

घर्म्मम्पात वसवो यजत वाट्॥ स्वाहा सूर्यस्य रश्मये वृष्टिवनये॥६॥

समुद्राय त्वा॥ समुद्राय त्वा वातायस्वाहा सरिराय त्वा वातायस्वाहा॥ अना

धृष्याय त्वा वातायस्वाहा प्रतिधृष्याय त्वा वाताय स्वाहा॥ अवस्यवे त्वा

वातायस्वाहाशिमिदाय त्वा वातायस्वाहा॥७॥ इन्द्राय त्वा॥ इन्द्राय त्वा व

सुमते रुद्रवते स्वाहेन्द्राय त्वादित्यवते स्वाहेन्द्राय त्वाभिमातिघ्ने स्वाहा॥ स

वित्रे त्वऽऋ भुमते विभुमते वाजवते स्वाहा बृहस्पतये त्वा विश्वदेव्यावते

स्वाहा॥८॥ यमाय त्वा॥ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा॥ स्वाहा घर्म्मा

सुस्वाहा घर्म्मः पित्रे ॥ ९ ॥ विश्वा ऽआशाः ॥ विश्वा ऽआशा दक्षिणसद्विश्वा
न्देवानयाडिह । स्वाहाकृतस्य घर्म्मस्य मधोः पिबतमश्विना ॥ १० ॥ दिवि
धाः ॥ दिवि धा ऽइमं यज्ञमिमं यज्ञन्दिवि धाः । स्वाहाग्नये यज्ञियाय
शंय्यजुर्भ्यः ॥ ११ ॥ अश्विना घर्म्मम् ॥ अश्विना घर्म्मं पातᳪ हार्द्वानमहर्द्दिवा
भिरूतिभिः ॥ तन्त्रायिणे नमो द्यावापृथिवीभ्याम् ॥ १२ ॥ अपाताम् अश्विना ॥ अ
पातामश्विना घर्म्ममनु द्यावापृथिवी ऽअमᳪसाताम् । इहैव रातयः सन्तु ॥ १३ ॥
इषे पिन्वस्व ॥ इषे पिन्वस्वोर्ज्जे पिन्वस्व ब्रह्मणे पिन्वस्व क्षत्राय पिन्वस्व
द्यावापृथिवीभ्याम्पिन्वस्व ॥ धर्म्मासि सुधर्म्मामेन्यस्मे नृम्णानि धारय

च मस्मे नियच्छ देव वायुवम् ॥१६॥ अपश्यं गोपाम् ॥ अपश्यं गोपामनि
पद्यमानमा च परा च पथिभिश्चरंतम् ॥ स सध्रीचीः स विषूचीर्वसान आव
रीवर्त्ति भुवनेष्वंतः ॥१७॥ विश्वासां भुवां पते ॥ विश्वस्य मनसस्पते विश्व
स्य वचसस्पते सर्वस्य वचसस्पते ॥ देवश्रुत्त्वं देव घर्म देवो देवान्पाह्य
त्र प्रावीरनु वां देववीतये ॥ मधुमाध्वीभ्यां मधुमाधूचीभ्याम् ॥१८॥ हृदे त्वा
हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा ॥ ऊर्ध्वोऽअध्वरं दिवि देवेषु धेहि ॥१९॥
पिता नोसि ॥ पिता नोसि पिता नो बोधि नमस्तेऽअस्तु मा मा हिंसीः ॥ त्वष्टृमन्त
स्त्वा सपेम पुत्रान्पशून्मयि धेहि प्रजामस्मासु धेह्यरिष्टाहं सह पत्या भू

धासमं॥२०॥ अहः केतुना जुषतां सुज्योतिर्ज्योतिषा स्वाहा॥ रात्रिः केतु
ना जुषतां सुज्योतिर्ज्योतिषा स्वाहा॥२१॥ इति संहितापाठे सप्तत्रिंशोध्या
यः॥ देवस्य त्वा॥ सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्॥ आद
दे दित्यै रास्नासि॥१॥ इड एह्यदित एहि सरस्वत्येहि॥ असावेह्यसावेह्य
सावेहि॥२॥ अदित्यै रास्नासीन्द्राण्या उष्णीषः पूषासि घर्माय दीष्व॥३॥
अश्विभ्यां पिन्वस्व सरस्वत्यै पिन्वस्वेन्द्राय पिन्वस्व॥ स्वाहेन्द्रवत्स्वाहेन्द्र
वत्स्वाहेन्द्रवत्॥४॥ यस्ते स्तनः शशयो यो मयोभूर्यो रत्नधा वसुविद्यः
सुदत्रः। येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवे कः॥ उर्व
न्तरिक्षमन्वेमि॥५॥ गायत्रं छन्दोसि त्रैष्टुभं छन्दोसि द्यावापृथिवीभ्यां

213

मे लिधारय प्रजान्धारय वृष्टिन्धारय ॥१४॥ स्वाहा पूष्णे ॥ स्वाहा पूष्णे शरसे स्वा
हा ग्रावभ्यः स्वाहा प्रतिरवेभ्यः ॥ स्वाहा पितृभ्यऽऊर्द्ध्वबर्हिर्भ्यो घर्म्म
पावभ्यः स्वाहा द्यावापृथिवीभ्याᳬं स्वाहा विश्वेभ्यो देवेभ्यः ॥१५॥ स्वाहा
रुद्राय ॥ स्वाहा रुद्राय रुद्रहूतये स्वाहा सं ज्योतिषा ज्योतिः ॥ अहः के
तुना जुषताᳬं सुज्योतिर्ज्योतिषा स्वाहा ॥ रात्रिः केतुना जुषताᳬं सु
ज्योतिर्ज्योतिषा स्वाहा ॥ मधु हुतमिन्द्रतमेऽअग्नावश्याम ते (देव) घ
र्म्म नमस्तेऽअस्तु मा मा हिᳬंसीः ॥१६॥ अभीमं ॥ अभीमं महिमा दिवं
विप्रो बभूव सप्रथाः ॥ उत श्रवसा पृथिवीᳬं सᳬंसीदस्व महाँ२॥

७

ओस्मि रोचे स्वदेवु वीतमः॥ विहु ममग्ने ऽ अनु पश्मिये घस्तु जपुरास्तदर्शं
तम्॥१७॥ यो ते॥ या ते घर्म्म दिव्या शुग्या गायत्र्यां हविर्द्धाने॥ सा तु ऽ
आप्प्यायतान्निष्ट्यायतान्तस्यै ते स्वाहा॥ या ते घर्म्मान्तरिक्षे शुग्या त्रिष्टुभ्या
ग्नीध्रे॥ सा तु ऽ आप्यायतान्निष्ट्यायतान्तस्यै ते स्वाहा॥ या ते घर्म्म पृथिव्यां
शुग्या जगत्यां सदस्या॥ सा तु ऽ आप्यायतान्निष्ट्यायतान्तस्यै ते स्वाहा॥
या ते घर्म्मान्तरिक्षे शुग्या त्रिष्टुभ्याग्नीध्रे॥ सा त ऽ आप्यायतान्निष्ट्या॥१८॥
क्षत्रस्य त्वा॥ क्षत्रस्य त्वा परस्पाय ब्रह्मणस्तन्वं पाहि॥ विशस्त्वा ध
र्म्मणा वयमनु क्रामाम सुविताय नव्यसे॥१९॥ चतुः स्रक्तिर्नाभिः॥ च

तुः स्वक्ति न्नोभि र्कृतस्य सुप्रथाः स नौ ह्रिष्मा युः सप्रथाः स नः स र्बो पुः सुप्र

थाः ॥ अपुहृंषोऽ अपुक्रोशेन्यङ्गे तस्य साक्षिम ॥२०॥ घर्मैतल् ॥ घर्मेत तुपु

रीषुन्तेन घुर्दे स्तुचावेप्वायस्व ॥ घेद्विंषीमहि वघुयमावेप्यासिषीमहि ॥

॥२१॥ अविंकृदुह्रुषा ॥ अविक्रदुह्रुषा हरिम्मेहान्मित्रो नदर्शेतः ॥ स० स्तुर्यै

ण दि घुत दुद्द घिन्ति घिः ॥२२॥ सुमित्रियानः ॥ सुमित्रियानःऽ आपःऽ ओ

ष धयः सन्तु दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यञ्चं वयन्द्विष्मः ॥२३॥

उद्वयम् ॥ उद्वयन्तमसस्परिस्वः पस्यन्तऽ उत्तरम् ॥ देवन्देवत्रा

स्वर्गमगन्मज्योतिरुत्तमम् ॥२४॥ एधोऽसि ॥ एधोस्यधिषीमहिस

मिन्द्रासि तेजो ऽसि तेजो मयि धेहि ॥२५॥ यावती द्यावा पृथिवी ॥ यावती द्यावा
पृथिवी यावच्च सप्त सिन्धवो वितस्थिरे ॥ तावन्तमिन्द्र ते ग्रहꣳ सहोर्जा गृ
ह्णाम्यक्षितं मयि गृह्णाम्यक्षितम् ॥२६॥ मयि त्यत् ॥ मयि त्यदिन्द्रि
(पे) यम्बृहन्मयि दक्षो मयि क्रतुः ॥ घर्मस्त्रिशुग्विराजति विराजा ज्योतिषा
सह ब्रह्मणा तेजसा सह ॥२७॥ पयसो रेतः ॥ पयसो रेत आभृतं तस्य दो
हमशीमह्युत्तरामुत्तराꣳ समाम् ॥ त्विषः संवृक् क्रत्वे दक्षस्य ते सुषु
म्णस्य ते सुषुम्णाग्निहुतः ॥ इन्द्रपीतस्य प्रजापतिभक्षितस्य मधुम
तऽ उपहूत उपहूतस्य भक्षयामि ॥२८॥ इति संहितापाठे अष्टत्रिंशत्त

हितेन ॥ उग्रंल्लोहितेन मित्रंᳬ सौव्रत्येन रुद्रन्दौर्व्रत्येनेन्द्रम्प्रक्रीडेन मरु
तो बलेन साध्यान्प्रमुदा ॥ भवस्य कण्ठ्यंᳬ रुद्रस्यान्तः पार्श्व्यम्महादे
वस्य यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत ॥ ९ ॥ लोमभ्यः स्वाहा ॥ लोम
भ्यः स्वाहा लोमभ्यः स्वाहा त्वचे स्वाहा त्वचे स्वाहा लोहिताय स्वाहा लोहिताय स्वा
हा मेदोभ्यः स्वाहा मेदोभ्यः स्वाहा ॥ मांᳬसेभ्यः स्वाहा मांᳬसेभ्यः स्वाहा स्ना
वभ्यः स्वाहा स्नावभ्यः स्वाहा स्थभ्यः स्वाहा स्थभ्यः स्वाहा मज्जभ्यः स्वाहा मु
ज्जभ्यः स्वाहा ॥ रेतसे स्वाहा पायवे स्वाहा ॥ १० ॥ आयासाय स्वाहा ॥ आया
साय स्वाहा प्रायासाय स्वाहा संयासाय स्वाहा वियासाय स्वाहोद्यासाय स्वा

हा॥ शुचे स्वाहा शो॥ चते स्वाहा शो॥ चमानाय स्वाहा शोकाय स्वाहा॥११॥ तपसे स्वाहा॥
तपसे स्वाहा तप्यते स्वाहा तप्यमानाय स्वाहा तप्ताय स्वाहा घर्माय स्वाहा॥ निष्कृ-
त्यै स्वाहा प्रायश्चित्यै स्वाहा भेषजाय स्वाहा॥१२॥ यमाय स्वाहा॥ यमाय स्वा-
हा न्तकाय स्वाहा मृत्यवे स्वाहा॥ ब्रह्मणे स्वाहा ब्रह्महत्यायै स्वाहा वि-
श्वेभ्यो देवेभ्यः स्वाहा द्यावापृथिवीभ्याᳬ स्वाहा॥१३॥ इति संहितापाठे
...नचत्वारिंशत्तमोऽध्यायः॥ ईशावास्यम्॥ ईशावास्यमिदᳬ सर्वं यत्किंच ज- मि
गत्यां जगत्यां जगत्॥ तेन त्यक्तेन भुंजीथा मा गृधः कस्य स्विद्धनम्॥१॥
कुर्वन्नेव॥ कुर्वन्नेवेह कर्माणि जिजीविषेच्छतᳬ समाः॥ एवं त्वयि नान्यथे- पि

मोध्याय नः॥ स्वाहा प्राणेभ्यः॥ स्वाहा प्राणेभ्यः साधिपतिकेभ्यः॥ पृथि
व्यै स्वाहाग्नये स्वाहान्तरिक्षाय स्वाहा वायवे स्वाहा॥ दिवे स्वाहा सूर्याय स्वा
हा॥१॥ दिग्भ्यः स्वाहा॥ दिग्भ्यः स्वाहा चन्द्राय स्वाहा नक्षत्रेभ्यः स्वाहाद्भ्यः
स्वाहा वरुणाय स्वाहा॥ नाभ्यै स्वाहा पूताय स्वाहा॥२॥ वाचे स्वाहा॥ वाचे
स्वाहा प्राणाय स्वाहा प्राणाय स्वाहा॥ चक्षुषे स्वाहा चक्षुषे स्वाहा श्रोत्रा
य स्वाहा श्रोत्राय स्वाहा॥३॥ मनसः काममा॥ मनसः काममाकूतिं वाचः
सत्यमशीय॥ पशूनां रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वा
हा॥४॥ प्रजापतिः सम्भ्रियमाणः॥ प्रजापतिः सम्भ्रियमाणः सम्राट्स
म्भृतो वैश्वदेवः संसन्नो घर्म्मः प्रवृक्तस्तेज उद्यत आश्विनः

पयस्यानीयमाने पौष्णो। वैश्वदेवऽउन्नीनो मारुतः क्लथन्॥ मैत्रः शरसि संताप्यमाने वायव्यो ह्रियमाणऽआग्नेयो हूयमानो वाग्घुतः॥५॥ सविता प्रथमे॥ सविता प्रथमेऽहन्नग्निर्द्वितीये वायुस्तृतीयऽआदित्यश्चतुर्थे चन्द्रमाः पञ्चमऽऋतुः षष्ठे मरुतः सप्तमे बृहस्पतिरष्टमे॥ मित्रो नवमे वरुणो दशमऽइन्द्रऽएकादशे विश्वेदेवा द्वादशे॥६॥ उग्रश्च॥ उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च॥ सासह्वांश्चाभियुग्वा च विक्षिपः स्वाहा॥७॥ अग्निँ हृदयेन॥ अग्निँ हृदयेनाशनिँ हृदयाग्रेण पशुपतिं कृत्स्नहृदयेन भवं यक्ना॥ शर्वं मतस्नाभ्यामीशानं मन्युना महादेवमन्तः पर्शव्येनोग्रं देवं वनिष्ठुना वसिष्ठहनुः शिङ्गीनि कोश्याभ्याम्॥८॥ उग्रँल्लो